Pʊ L ɪɪ ʀ: Tu m J vaj } th N' n ya- ɑar P s
P ɴ : R. Y Sh d , } 23 K bh L ı B b y

पदेशक्षमं ललितच्छन्दोबद्धमर्थगंभीरं च विद्यते एतद्व्याख्यापि मञ्जुलैव व्याख्यात्रा प्रणीतास्ति संप्रत्यस्यैकं स याख्यं २ द्विशतवर्षेभ्य. पूर्व लिखितं पुस्तक प्राय:शुद्धमुपलब्धम् तस्मात्पूर्वमुद्रित संवाद्य सम्यक्परि शोध्यास्माभिरिद सुचिक्कणपत्रेषु मधुराक्षरै सुव्यवस्थया मुद्रितमस्ति अस्य सर्वोपयुक्तत्व सौभाग्यंच दर्शनसमकालमेव स्फुटीभविष्यति

विद्वदेकान्तवशंवद **पणशीकरो वासुदेवशर्मा**

उ देश ाह ी रण नु म

इति उपदेशसाहस्रीप्रकरणविषयानुक्रम

अथात्र प्रास्ताविकम्

वेद क पेभ्यो नम्र धूत्त म्
ज्हा लि गो स्त ै ड्ड वे :

इह जगति धर्मादिचतुःपुरुषार्थसपत्तिर्हि वेदार्थज्ञानाधीनेति निर्वि वादम् वेदस्तदर्थश्चातिगहन इति तदर्थमाकलय्य लोकोद्दिधीर्षुणा परमकारुणिकेन श्रीमच्छंकराचार्येण नैकश सन्ति संदृब्धा ग्रन्थाः शंकराचार्यस्तावत्कलिगतेषु ३८८९ वर्षेषु प्रादुर्बभूवेति विज्ञायते तथा चोक्तं शकरमन्दारसौरभे **प्र सूत ि यशरदामतिया वत्या मेकाद ा धि शतोनचतु सह याम्** इति अन्यत्रापि **निधि न गेभ ह्वयब्दे ३८८९ विभ े मासि धवे क्के ि थौ द यां श रार्योदय मृत** इति च तेन वैक्रमवत्सरमानेन ८ ५ मिते वर्षगणे प्रादुर्बभूवेति निश्चीयते यद्यप्यत्र विषये भिन्न भिन्नारभव्या विवदन्ते विद्वांसः तथापि शिरोनिर्दिष्टप्रमाणेनायमेव तेष मवत रसमय इति न सिद्ध न्त आस्तामयं समयविवाद· यत्तैरवतीर्या खिलधरामण्डले अद्वैतवेदान्तसिद्धान्तप्रणयनादिभिरतीवोपक्कृतं न तथान्येन केनापीति जगद्गुरुत्वमेषामेवाधिकं राजते तत्प्रणीतेष्विय **पदेशसाह ाी** १९ एकोनविंशतिप्रकरणोपेता अद्वैतवेदान्तसिद्धा न्तानुद्बोधयन्ती जागर्ति सर्वत्र भारतवर्षेषु अस्या एकैकं पद्यं सर्वो

पदेशक्षम ललितच्छ दोबद्धमर्थग भीर च विद्यते एतद्व्याख्यापि मञ्जुलैव व्याख्यात्रा प्रणीतास्ति संप्रत्यस्यैकं स य ख्यं २ द्विशतवर्षेभ्यः पूर्वं लिखितं पुस्तकं प्रायःशुद्धमुपलब्धम् तस्म त्पूर्वमुद्रित संवाद्य सम्यक्परि शोध्यास्माभिरिद सुचिक्कणपत्रेषु मधुराक्षरै· सुव्यवस्थया मुद्रितमस्ति अस्य सर्वोपयुक्तत्व सौभ ग्यंच दर्शनसमकालमेव स्फुटीभवि यति

विद्वदेक न्तवशवद पणशी रो वासुदेवश ।

उ दे ाह ी रण नु

इति उपदेशसाहस्रीप्रकरणविषयानुक्रम

श्री च्छङ्कर चाय णीता

उपदेशसाहस्री

श्रीमद्रामतीर्थविरचितपदयोजनिकाव्याख्यायुता

उपोद्घात करणम् १

यत्र ध्यस्तमिद सर्वं मेयम त्र द्यविद्यय
भ ति नो भाति यज्ज्ञानात्तदस्मि ब्र चित्सुखम् १

तदेवं सर्वोपनिषदर्थस रसंग्रह गद्यब धप्रब धेन सक्षेपतो युक्तयो पदिश्य पुनरप्युक्तमेवार्थजातं पद्यब धप्रब धेन सोपस्कर विस्तरेणो पदेष्टुकामो भगवा भा यकारः पद्यग्र थार भे ग्र थप्रतिप द्यपरदेवता नमस्क ररूप मङ्गल कृत शि यशिक्षार्थं श्लोकेनोपनिबध्न ति

चैत य सर्वग र्व र्वभू ह मु
(वि याती सै र्वविदे म १

चै यमि ति तसै सामा यत· प्रसिद्ध य नम· प्रह्वीभावो भूय दि र्थ. तस्य विशेषजिज्ञासायां लक्षणमाह सर्वविद इति सर्वं वेत्तीति सर्ववित्तसै सर्वश देन भूत भवद्भवि यदि तद मक जगदुच्यते तत्सर्वं सर्वावस्थ सर्वदा सवितृवत्सनिधिसत्तामात्रेण प्रक श

यत्सर्ववित् नहीद जडं स्वसत्तास्फूर्त्योः स्वतन्त्रं भवति अतो यदधी नसत्तास्फूर्तिमदिदं तदस्ति सर्वज्ञ सर्ववित्सर्वाश्रय इति तटस्थलक्षणं सिद्ध भवतीति भावः एवं जगत्प्रवृत्तिस्थितिसंहारनियामकत्वेन स मात्रतया ताटस्थ्येन लक्षितस्य स्वरूपलक्षणं वदन् सर्वविषयवेदना श्रयतया सर्ववित्त्वमिति वैशेषिक दिमताशङ्कां वारयति चैत यमि ति य ैत यं चितिस्वभ वं ज्ञानस्वरूपं तस्मै इति यत्तच्छब्दयोः संब धः विज्ञानमान दं ब्रह्म सत्यं ज्ञानमन तं ब्रह्मे त्य दिश्रुतिभ्यः नह्य चित्स्वभ वस्य चिद्धर्मकता युज्यते न खल्वनुष्णस्वभावकं .ष्णमु ष्णत्वधर्मक भवतीति भावः चिदेकरसस्यापि सर्वज्ञत्वं मायोपा धिक यावहारिकमित्यनवद्यम् न चेतनोऽणुपरिमाण इत्येकदेशि नो मध्यमपरिमाण इति दिगम्बरा म य ते अतस्तस्य सर्वविषयसंस र्ग भावे कथं सर्वज्ञत्वम् प्रकाशो हि स वित्रादिः स्वसंसृष्ट एव प्रकाशव्यवहारहेतुर्नासंसृष्टे विषय इत्यत आह सर्वगमिति 'नित्यं विभुं सर्वगतं आकाशवत्सर्वगतश्च नित्यः स पर्यगा च्छुक्र मित्यादिश्रतिविरोधादणुपरिमाणत्वादिकल्पनानवक श इति उत्क्रान्त्यादे र्लिङ्गोप धिकत्वश्रवणान्न तेन स्वाभाविकविभुत्वार्थकश्रुति बाध इति दिक् ननु सर्वगमित्युक्ते सर्वम यत्तद्गतं च ब्रह्म यदिति तस्य वस्तुपरिच्छेदप्रतिभ सात्सांख्यादिवादिमतवत्सजातीयविजाती यभेदवत्त्वं प्र सक्तमित्यत आह सर्वमिति सर्वं खल्विदं ब्रह्म इद सर्वं यदयमात्मा आत्मैवेदं सर्वमि त्यादिश्रुतेरित्यर्थः अनेन सर्वोपा दानत्वमुक्तम् उपादान हि स्वकार्यं सर्वं यामुवच्य पक भवति नानु पादानम् तद्धि[1]देकदेशेन संसृज्यमानमव्यापकमेव भवतीत्यतः सर्वो पादानत्वात्सर्वमित्यभिप्रायः सव त्मकमपि ब्रह्म जीवाद्व्यावृत्तं जीवस्य

---

१ त्यादिलिङ्ग २ तद्ध्येकदेशेन

ब्रह्मणोऽभिन्नत्वात् नह्यसंसारि संसारिभावेन विरुद्धधर्मव गोरैक्य सभवति दहनतुहिनवदित्यत आह सर्वभूतगुहाशयमिति सर्वे भूतानां स्थावरजङ्गम नां गुहासु बुद्धिपु शेत इति सवभूतगुह शयम् गूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धिः गूहते सवर ण र्थस्य धातोरिद रूपम् सर्वप्राणिवुद्ध्य तःसाक्षितया निर्विकार वर्तत इत्यर्थः तथाच श्रुतिः यो वेद निहित गुहायां परमे व्योमन्' हृद्य तज्योतिः पुरुषः स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदय मित्याद्या तथाच तत्सृष्ट्वा तदेव नुप्राविश दित्य दिना स्रष्टुरेव ब्रह्मणो जीवरूपेण प्रवेशश्रवणात् अयमात्मा ब्र त्यादितादा त्म्यश्रुतेश्च न ब्रह्मणोऽ यो जीव इत्यवधार्यते विरुद्धधर्मसंसर्गप्रात भासस्तूपाधिनिब धनो न स्वरूपनिब धन इति भावः एतेन जीवो नाम ब्रह्मणोंऽशो विकारो वा स्वतन्त्र एवेति भेदाभेद(भेद)वादिपक्षा निराकृता वेदितव्याः **ननु** सर्वभूतगुहाशयत्वे ब्रह्मणो मानसवेद्यत्वं स्य त्तथा सर्वात्मत्वे प्रपञ्च त्मत्वप्राप्तिरिति शङ्कायामाह यत्सर्वविषय तीतमिति सर्वमविद्यातत्कार्यात्मकं विपयमतीत्य[२] यवस्थितमित्य क्षरार्थः माय तु प्रकृतिं विद्य मायिनं तु महेश्वर मित्य दिश्रुते परमेश्वराधिष्ठितमायाविवर्तत्वावगमात् सर्वस्य मायायाश्चानिर्वच नीयत्वाच्च परमार्थ किमपि ब्रह्मणो भिन्नं वस्त्वस्ति तथा तत् सवा तः करणतत्प्रच रसाक्षिणो न मानसवेद्यत्व संभाव्यते । नहि मि्य ष्टिगृहीतेन मरीच्युदक दिन भूम्याद्युदकादिमत्परमार्थतो भ ति नवा का नाग्नि प्रक श्यते दह्यते वा अतो युक्त सर्वविषयातीत त्वमिति भावः तथाच श्रुतिः नेतिनेति नेहनानास्ति किंचन यतो वाचो निवर्त ते अप्राप्य मनसा सहे त्याद्या अत्र चैत यमि

१ एववेति भेदा २ त्यावस्थित

ादिविशेषणत्रय तत्वपद र्थस धारण सर्वभूतगुहाशयमिति च बुद्ध्या-
दिसाक्षी त्वंपदार्थ उक्तः सर्ववित्पदेन तत्पदव च्यं ब्रह्मोच्यते सर्ववि-
षयातीतमिति तत्पदलक्ष्यमुक्तम् यत्तच्छब्दयोः सामानाधिकर याद
क र्थवृत्तित्वे सति तत्त्वंपद र्थयोरैक्यमख डवाक्य र्थस्तात्पर्यवृत्त्या
प्रतिप दितो भवति तदेवं मङ्गलाचरणव्याजेन वेदा तशास्त्रीयविषया
द्यनुब धोऽ यत्र प्रपञ्चितोऽस्य तत्प्रकरणत्वद्योतनाय तथाहि उक्त
वाक्यार्थे विषयश्चैत य सर्वविषयातीतमिति च चिदात्मन' सर्वानर्थ
सस्पर्शित्वाभावोक्तेरशेषानर्थनिवृत्त्युपलक्षितं निरतिशयान दाविर्भा-
व त्मक ब्र ैव प्रयोजन क्तम् अर्थात्तत्कामोऽधिकारी सूचित एव
भवति उक्तविशेषणानां वेदा ते वेव प्रसिद्धेः शास्त्रब्र णोः प्रतिपा
द्यप्रतिपादकभ वः सब धो ध्वनित इति १

एव देवतानमस्कारव्याजेन वेदा तप्रतिपाद्यपरदेवतातत्त्वमुपक्षि-
सम् इद नीं वेदानां तत्परत्वं प्रतिप दयितुं कर्मका डनिर्वृत्तमर्थमनूद्य
तेन ज्ञ नका डाख्यवेद तानां सगतिमभिदधानस्तेषामगतार्थत्वमन
यशेषत्व च तावदाह

म य ग्निय व द र ाध नपूर्विका
विद्य थेदानीं वक्तु वेद प्रच मे । २

ा येति वेद इदानीं ब्रह्मविद्यां वक्तु प्रचक्रम इत्य वयः
इद नीमिति जिज्ञासोरुपस्थितिसमय उक्तः अथेति जिज्ञासाप्रवृ
त्तिप्रयोजकहेतुसाधनचतु यसपत्त्यान तयमुच्यते तथाच विवेक
वैरा यशमादिसाधनसप स्य मुमुक्षोर्मोक्षस धनब्र विद्या साक्षात्प्रति
पादयितु ज्ञानक डात्मको वेदः प्रवर्तत इत्यर्थः कुतोऽस्य साधनस

१ वेदान्ता ।

पत्तिरित्यपेक्षायां कर्मकाण्डोक्तकर्मानु ानजनितबुद्धिशुद्धित इत्यभि
प्रेत्य ह समापय्येत्यर्धेन दाराग्न्याधानपूर्वका इति विहितक्रिया
म त्रोपलक्षणम् नित्यनैमित्तिकप्रायश्चित्तोपासनारूपाः सर्वाश्रमप्रयु
क्ता विधिविहिताः सर्वः क्रिय : समापय्य समाप्तिं प्र पय्य कर्मका
डात्मनानुष्ठेयकर्माणि प्रतिपाद्य स्थितो वेद इति सब धः अय
भावः वेदो हि स्वतःप्रमाणभूतः सर्वार्थप्रकाशको नित्यनिरतिशय
पुरुषार्थमर्थयमानस्य तदुपायं मृगयतः सर्वोत्साहं प्रयतमानस्यापि
तमलभमानस्य तादृक्पुरुषार्थसाधन प्रत्यक्षादिभिरनवगम्यमानमुपदेष्टु
प्रवर्तते नित्यनिरतिशयपुरुषार्थश्च मोक्ष एव न य इति मोक्षोपाय
प्रतिपादने वेदतात्पर्यमवगम्यते श्रुतिस्मृती चात्र भवतः सर्वे
वेदा यत्पदमामनन्ति सवे वेदा यत्रैकीभवन्ति स मानसीन आत्मा
जनाना मिति वेदैश्च सर्वैरहमेव वेद्य इतिच मोक्षसाधनं च साक्षा
दात्मतत्त्वज्ञानमेव तमेव विदित्वातिमृत्युमेति ना य॰ प था विद्यते
ऽयनाये तिश्रुतेस्तच्च नाशुद्धा तःकरणस्योपदेष्टुं युक्त तस्य तद्ग्रहण
सामर्थ्याभ वात् श्रतिश्च भवति न विरतो दुश्चरितान्नाश तो
नासमाहितः नाशा तमानसो वापि प्रज्ञानेनैनमाप्नुया दिति अत
स्तस्य ज्ञानोत्पत्तिप्रतिब धकदुरितक्षयार्थानि नित्यानि कर्माणि प्रथमं
विद्यते त नि च संयोगरूपचोदनासमाख्य नामविशेषेण सर्वश स्वा-
प्रत्यय य येनेतिकतव्याङ्गकलापपरिमाणाधिकारिविशेषोक्तिपूर्वकमनु
ष्ठापयति धर्मेण पापमपनुदति न कर्म लि यते नरे अविद्यया
मृत्युं तीर्त्वे त्यादिश्रुतेर्दुरितक्षय एव धर्मानुष्ठ नस्य पर प्रयोजनं पर
परया परमपुरुषार्थोपयोगित्वात् नतु कर्मणा पितृलोक इत्याद्युक्त
पितृलोकादिः प्रयोजनम् तस्य क्षयादिदोषदुष्टतया हेयत्वात् अ नुष
ङ्गिक हि तत्कर्मफल भवति नवदपि नेद चित्तशुद्धिप्रतिब धकम्

तदुक्तं सुरेश्वराचार्यैः. नित्येषु शुद्धिप्रधाया द्योगोऽप्यप्रतिबन्धकः. भोगमङ्कुरमीक्ष्यन्ते बुद्धिशुद्धिस्तु रोचत इति काम्याभिचारादि कर्मविधानं तु पुरुषवशीकरणेन स्वाभाविकप्रवृत्तिनिवारणार्थमित्येषा दिक् तथाच चित्तशुद्धेः प्रथमपेक्षितत्वात्तदर्थं कर्मविधानं प्रथमं प्रवर्तते पश्च ज्ञानोपदेश इति कर्मज्ञानकाण्डयोरर्थद्वारा हेतुहेतुमद्भावेन पौर्वापर्यसंबन्ध उक्तः ज्ञानकाण्डस्य साक्षात्फलार्थविषयत्वात्कर्मभिरनपेक्षितार्थत्वाच्चागतार्थत्वमनर्थशेषत्वं च तस्य सिद्धमिति २

ननु कर्माणि कृतानि कर्तुः फलप्रदानि लोके दृष्टानि यथा पित्रादिभिरुपदिष्टविषयाणीष्टफलानि तैर्निषिद्धविषयाण्यनिष्टफलानि, तदुदास्तविषयाणि दैवाधीनतयोभयार्थानि तथा वेदविहितानि कर्माणीष्टफलानि निषिद्धान्यनिष्टफलानि विहितप्रतिषिद्धव्यामिश्रकर्माणीष्टानिष्टव्यामिश्रफलानि भवन्ति तथाच शास्त्रं अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलमिति एवंच कर्मणां फलाव्यभिचारा मोक्षस्य च फलविशेषत्वात्कर्मविशेषसाध्यत्वोपपत्तेर्न विद्यया कृत्यमस्तीति न तदर्थानि ज्ञानकाण्डानि मुमुक्षुणा विचारणीयानि किंतु कर्माण्येव कानिचिच्चातुर्मास्यादीन्यक्षय्यफलार्थान्यनुष्ठेयानीति कर्मजडानां प्रत्यवस्थानमित्याशङ्क्याह

कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये
ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः ३

कर्माणीति द्वाभ्याम् कर्मफलं हि जात्यायुर्भोगलक्षणं तच्च देहसंबन्धं विना नोपपद्यत इति कर्माणि देहयोगार्थमेवेत्यर्थः देहयोगे च संसारो दुर्वार इत्याह देहयोग इति देहसंबन्धे सति

प्रियाप्रिये सुखदुःखे ध्रुवे स्यातां भवेत मेव   न वै सशरीरस्य सत.
प्रियाप्रिययोरपहतिरस्ती तिश्रुते   ततः सुखदु'खयोस्तत्साधनयोश्च
यथासख्यं रागद्वेषौ वासनारूपौ स्याताम्   ततो रागद्वेष ख्य न्निमि
त्तात्क्रिया वाङ्मनःकायचेष्टाः स्युरित्यर्थः   ३

धर्मधर्मौ त ो स्य देहयोगस्तथ
एव नित्य ोऽय स ारश्चक्रवद्भृ म्

अज्ञस्य प्रत्यगात्मतत्त्वं ब्रह्माजानतोऽहंकारपारवश्यस्य तत क्रिया
भ्यो विहितप्रतिषिद्धरूपाभ्यो धर्मधर्मौ पुनर्भवेताम् पुनस्ततो देहयो
गस्ततः प्रियाप्रिये इत्येवं संसारो ज ममरणकर्मकरणतत्फलभोगल
क्षणः कुलालचक्रवद्भृशमत्यर्थमविश्रमं यथा स्यात्तथा नित्यप्रवृत्तो
ऽनादिक लमारभ्य प्रवर्तते अयं प्रत्यक्ष इत्यर्थः तस दैहिक र्थानां
कर्मणामनित्यफलत्वस्य लोके ृष्टत्वादामुष्मिकफल र्थानामपि कर्म
त्वान्नित्यफलतानुमानात् तद्यथेह कर्मजितो लोकः क्षीयत एव
मेवामुत्र पु यंजितो लोकः क्षीयत इति वस्तुबलावलम्बिश्रुतेश्च
अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृत' मित्याद्यर्थवादश्रुत्यवलम्बनेन
कर्मफलस्य नित्यत्वाशा न कार्येति भावः   ४

न चेवमपि न मोक्षार्थिनो ज्ञानेन प्रयोजनमस्ति कृतकर्मण
संसारनिमित्तानां फलभोगान तरं नाशेसति निमित्ताभावान्नैमित्ति
काभाव इति यायादयत्नलभ्यत्वा मोक्षस्येत्याशङ्क्याज्ञानमूलत्वात्कर्म
णस्तस्मि सति तदनुपरम मेवमित्याह

अज्ञान तस्य मूल स्यादिति तद्धानमि यते
विद्यात अ र धा त ो नि श्रेयस भवेत्   ५

मेचित' पुण्यचितः इत्यपि पाठः

अज्ञानमिति यद्वा अज्ञस्य कर्मप्रवृत्त्यविरमत्ससराविरम क्रुतकर्मफलभोगसमयेऽपि कर्मप्रवृत्त्यवश्यभावात्पुनर्भोगसंतानाविच्छेदश्चेत्कथ तर्हि कर्मनिवृत्त्या मोक्षसिद्धिरिति विवक्षायामाह अज्ञानमिति अयमर्थः नीहारेण प्रावृता जल्प्या चासुतृप उक्थश स श्चरन्ति 'एक शत्रुर्न द्वितीयोऽस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् येनावि : कुरुते कार्यते च घोराणि कर्माणि सुदारुणानी त्यादिश्रुतिस्मृतिभ्योऽज्ञानं तस्य पूर्वोक्तस्य कर्मतत्फललक्षणस्य संसारस्य मूलं स्यादिति हेतोस्तस्याज्ञानस्य हानमात्यन्तिकोपरम इ यते यत्नेन संपादनीयतयाभिप्रेयते मूलो मूलनम तरेण प्ररोहा विच्छेदादित्यर्थः तरति शोकमात्मवित् यदा चर्मवदाकाश वे यिष्यन्ति म नवा. तदा देवमविज्ञाय दुःखस्य न्तो भवि यति ज्ञानेन तु तदज्ञ न येषां न शितमात्मन' तेपामादित्यवज्ज्ञ न प्र ाशयति तत्पर मित्यादिश्रुतिस्मृतिभ्यो यतोऽविद्यैवाज्ञ नहानहेतु रवगतातो ब्रह्मविद्य र धा अतो ब्रह्मविद्यया निःश्रेयसं कैवल्य भवे त्तदुदये न तरायकतयाऽज्ञ ननिवृत्तौ केवलात्मस्वरूपावस्थानरूपो मोक्षो ल ध इव भवेदित्यर्थः ५

ननु कर्मणां विचित्रशक्तित्वात् हिर यदा अमृतत्व भज त इत्य दिश्रुते कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादिस्मृतेश्च कर्मभिरेव मोक्षसिद्धेः कथं त ब्र विद्ययेति शङ्कामपाकुर्वन्नन तरोक्त मर्थमुपपादयति

वि ैव ा ह नाय न ि तिकू
न न ह े हि रागद्वे क्षयो भ े त् ६

विद्यवेति द्वाभ ाम् ससारमूलाज्ञ नहानाय विद्यैव समर्थेत्य

ध्याहारः एवकारार्थमाह न कर्मेति तत्र हेतुरप्रतिकूलत इति अविरोधादित्यर्थः विद्यैव प्रक शरूपत्वादप्रकाशरूपामविद्यां तत्कार्यं च निवर्तयति यथा रज्ज्वावरणाविद्यां तमसि तत्कल्पितसर्पाद्याक र च रज्जुतत्त्वज्ञानप्रदीपौ निवर्तयतः स्वभावविरोधात् कर्म तु नाज्ञानतमोनिवर्तकं तदविरोधित्व दप्रकाशात्मकत्व द्वा नीहारस्तोमवदित्याद्यनुमानैः ना यः प था विद्यतेऽयनाय इत्यादिश्रुतिभिश्च विरोधाद्धिर यदा इत्यादावापेक्षिकममृतत्वं पर्यवस्यति कर्मणैव ही ति स्मृतिः न कर्मणा न प्रजये तिश्रुतिविरोधेऽ यपरेत्यतो न तद्बला त्कर्मभिरज्ञ नहानशङ्केत्यभिप्रायः विद्यां विनाऽज्ञानक्षयाभावश्चेद ज्ञानक्षयार्थमेव विद्यान्विष्यतां तत्क र्यस्य तु परमार्थत्वाद्विद्यया नाशानुपपत्तेस्तन्नाशे हेत्व तरम न्वेषणीयमित्यत आह नाज्ञानस्येति अज्ञानस्य प्रहाणे रागादिक्षयो न स्याद विवेकपूर्वकत्वस्य रागादाव व य-व्यतिरेकसिद्धत्वादज्ञानमया रागादयो न परमार्था इत्यज्ञाननिवृ त्त्यैव निवर्त त इति न तत्र हेत्व तरा वेषणेत्यर्थः ६

रागाद्यनिवृत्तौ का हानिरिति तत्राह

रागद्वेषक्षयाभावे कर्म दोषोद्भव ध्रु म्
तस्मान्नि श्रेयसार्थाय विद्यैवात्र विधीयते ७

रागद्वेषेति दोषा रागद्वेषमोहास्तदुद्भव तद्धेतुकं कर्म ध्रुवं पुनः स्यादेवेति पुनः संसारो दुर्वार इत्यर्थः उपपादितमर्थमुपसंहरति तस्मादि ति अत्रेति वेदा तोक्तिः विधीयते प्रकाश्यत इत्यर्थः ७

तदेवमज्ञानमूलत्व त्संसारस्य ज्ञानमेव तन्निवर्तकं मोक्षहेतुर्न कर्मे युक्त तत्र यदि कर्मणां स्यात येण मोक्षहेतुता न सभवेत्तर्हि ज्ञानेन समुच्चयेसति तद्धेतुत स्य दिति स च्चयवादिमतमुत्थ पयति—

ननु ॰ तथा नित्य क य जीवने ति
विद्या । सहकारित्व मोक्ष ति हि द्व्रजेत् ८

ननु कर्मेति नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणै रिति स्मृत्युक्त यायेनावशे नापि जीवत पुरुषेण कर्म कर्त यमेव विद्य यथा तथा नित्यं कर्मावश्यं कर्त यं यावज्जीव मित्यादिश्रुतिविहितत्वादित्यर्थः उपयोगाभावा मुमुक्षुणा नित्यं कर्म न कर्त यमित्यत आह विद्याया इति विद्याया मोक्षप्रति कारणभूत याः सहकारित्वमितिकर्त यभावं हि यस्मात्तत्कर्म व्रजेत्प्राप्नुयादतस्तत्कार्यं मुमुक्षुणेत्यर्थः विद्ययामृ तमश्नुत इति तृतीयया ज्ञानस्य मोक्षकरणत्वावगमात्करणस्य चेति कर्त यतासापेक्षत्वाद् यस्य चेतिकर्त यस्यात्राभावात्कर्मभिरेव प्रयाजा दिभिर्दर्श दीव फलोपकार्यङ्गैर्ज्ञानं समुच्चीयत इति भावः ८

कर्मणा बध्यते ज तुर्विद्यया च विमुच्यते तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिन इत्यादिस्मृतेर्मुमुक्षुभिः कर्म न कर्तव्य-मि ति चेत्तत्राह

यथ विद्या तथ कर्म चोदितत्वाविशेषत
त्यवायस्मृतेश्चैव कार्यं कर्म मुमुक्षुभि ९

यथा विद्येति यथा विद्या मुमुक्षुभिः कार्या तथा कर्मापि कर्त यम् कुतः विद्यां चाविद्य च यस्तद्वेदोभयꣳसहे ति समुच्च यविधिना अविशेषेण चोदितत्वादित्यर्थः किंच अकुर्वन्विहितं कर्म निन्दितं च समाचरन् प्रसंजश्चेन्द्रियार्थेषु नरः पतनमृच्छति इत्यनु ने प्रत्यवायस्मृतेश्च कर्म कार्यमित्यर्थः तथाचोदाहृतश्च

तिस्मृतिविरोधे तस्मात्कर्म न कुर्वन्ति यतय इतायमपि स्मृतिर्ज्ञान प्रशस र्था वा भविष्यतीति भावः ९

अत्र सिद्धा ती विद्यायाः सहकार्यपेक्षितत्वमुक्तमाक्षिपति

ननु ध्रुवफला विद्या ना य त्किंचिदपेक्षते
न श्ि ष्टोमो यथैव यद्ध्रुवक र्योऽ यपेक्षते १

न वि ति ब्रह्मविद्या सहकारिनिरपेक्षा ध्रुवफलत्व द्धटादिज्ञान वदित्यर्थः पूर्ववादी यभिचारेण परिहरति नेति अवश्यं भाविफलोऽप्यग्निष्टोमो यथोद्गीथशस्त्रादितद्गतदेवताज्ञानसहकारिक र्मापेक्षते तथा विद्यापीत्यर्थः १

पूर्वपक्षमुपसंहरति

तथा ध्रुवफला विद्या कर्म नित्यमपेक्षते
इत्येव केचिदि न्ति न कर्म तिकूलत ११

इत्येव केचिदि च्छ तीति सिद्धा तं वक्तुमुपक्रमते नेत्या दिना विद्या स्वकार्ये न कर्मापेक्षते तत्प्रतिकूलत्वात्तद्विरोधित्वादि तियावत् नहि स्वप्रतिकूलः स्वसहायो भवति माभूत्तिमिरं तेजसः सहायभूतमित्यर्थः ११

कर्मणो विद्याप्रतिकूलत्वमुक्तं साधयति

विद्य या प्रतिकूल हि कर्म स्यात्स भिम नत
निर्विकारात्मबुद्धिश्च विद्येतीह प्रकीर्ति १२

विद्याया इत्यर्धेन हिशब्दः प्रसिद्धिद्योतकः साभिमानत इति ब्रह्म याद्यभिमानसहितपुरुषनिर्वर्त्यत्वात्कर्मणो विद्यायाश्च कूटस्थ त्मा

कारतया जात्याद्यभिमानहीननिष्ठत्वात्प्रसिद्धो विद्याकर्मणोर्विरोध इत्यर्थः हिशब्दद्योतितां प्रसिद्धिमुपपादयति निर्विकारेति न ह कर्ता भोक्ता किंतु कूटस्थं ब्रह्मैवास्मीत्येवमात्माकारा तःकरणवृत्तिर्वि द्येति इह वेदा तेषु विद्वद्भिः प्रकर्षेणोक्तेत्यर्थः कर्मत्वहं ब्राह्मणोऽस्य कर्मण कर्ता ममेदं कर्मसाध्यं फलं भविष्यतीत्यभिमानपूर्वकं प्रवर्तत इति प्रत्यक्षमतः स्फुटो विरोध इत्यर्थः १२

ज्ञानकर्मणोर तर्मुखत्वबहिर्मुखत्वाभ्यां प्रवृत्तितो विरोधमुक्त्वोत्प त्तितो विरोधमाह

अह कता ममेद स्यादिति कम व ते
स्त्वधीना भ द्विद्या त्र्धीनो भ द्विधि १३

वस्त्वधीनेति प्रम णवस्त्वधीना विद्या यथाप्रमाणं यथावस्तु च जायते न ;तत्र पुरुषस्वातन्त्र्यं संभवतीत्यर्थः विधिर्विधेयं कर्म कर्त्रधीनं पुरुषेण कर्तुमकर्तुम यथा वा कर्तुं शक्यमतः पुरुषस्वात न्या स्वात न्यरूपविरुद्धहेतुज यत्वान्न कर्मज्ञानयोः समुच्चय इत्यर्थ १३

किंच विद्यायां सत्यां कर्मणो निराश्रयतया स्वरूपालाभान्न ज्ञान सहकारितेति विन्य तरेण विरोधमाह

रक युपमृद्न ति विद्य द्धिमिवोखरे
इति तत्सत्यम दाय कर्म क यवस्यति १४

क रकाणीति ऊखरदेशे जातामुदकबुद्धिं यथोखरस्वभावावल म्बिनी विद्योपमृद्नाति तथात्म यविद्याध्यस्तकारकबुद्धिमात्मस्वभावा वल बिनी विद्योपमृद्नात्येवेत्यर्थः इति तत्सत्यमित्यर्धश्लोकः पूर्वेणै ान्वेति उपमृद्नातीति यतोऽतस्तत्कारकजात सत्यमादाय कर्म कर्तुं ज्ञ नी कथ व्यवस्यतीति कथशब्दाध्याहारेणाय योजनीयः १४

विरुद्धत्वकृतसमु यासभवे फलितम ह

विरुद्धत्वाद य मं क न वि
है विदु । त्म हेय क्षुण ५

विरुद्धत्वादिति अतो विरुद्धत्वादिति सामानाधिकर यम् विद्यया सह कर्म कर्तुं विदुषा न शक्यमेवे य वयः । समु यनिराकरणफलमाह तस्मादिति १५

ननु ज्ञात्वा कम समाचरे दित्य दिवचनात्स्वर्गकामादिविध्य यथानुपपत्तेश्च देहादि यति रिक्तात्मज्ञानवत. कर्मानधिकारात् ज्ञानकर्मणोर्विरोधे च तदयोगादधि ार्यभावेन कर्मका डस्याप्रामा य प्राप्तमि ाशङ्क्य कर्मस्वरूपभेदाङ्गविशेषप्रयुक्तक्रमाधिकार दिविशेषज्ञानस्य देहादि यतिरिक्तात्मज्ञानस्य च कर्मविशेषाधिकारि यपेक्षितत्वेऽपि न परमात्मतत्त्वज्ञानं तत्रापेक्ष्यतेऽनुपयोगादधिकारिविरोधाच्चेत्य भिप्रेत्य समाधत्ते

देह रविशे देहिनो ह निजम्
ाणि ना तदवि ोत्थ । त्कर्मविधिर्भ त् १६

देहाद्यैरिति यद्वा यद्योपनिषद ज्ञ न कर्मकारकभेदोपमर्दक स्यात्तदा ज्ञानका डेन कर्मका डस्य नि र्विषयीकरणाद्ध धितविषयं कर्मका मप्रमाणं स्य त्तच्चानिष्ट स्व ध्यायाध्ययनविधिविरोधादित्याशङ्क्य किमात्म त्वज्ञाना प्र गूर्ध्वं वा तदप्रामा यापत्तिरि ति विकल्प य द्यं निरा करोति देह द्यैरिति देहिन आत्मनो देह द्यैरिन्द्रियमनोबुद्धिप्र णतद्धर्मैरविशेषेणाविवेकेन ग्रहण तद्विशि तयैवात्माभिम नरूप निज स्वाभाविक न योषिद दाव य दिभा बुद्धिवद्विध्यधीन यदेवविध प्रा

णिनामात्मज्ञानं तदविद्योत्थमनाद्यज्ञानजभ्रान्तिसंस्कारोत्थं सर्वसाधारणत्वाद्यावदेवं ब्राह्मणोऽहं गृहस्थोऽह सकलेन्द्रियवानहं सकामो बलवानित्य द्विज्ञानमनुवर्तते तावत्कर्मविधिः कर्मका डं प्रमाणं भवेदित्यर्थः प्रमितिजनक हि प्रमाणं भवति अधिकारिणश्च प्रमितिजनको वेदो न नधिक रिण इति स्थिते कर्मप्रवृत्तिपर्य तं प्रमितिजनकस्य विधिका डस्योक्ताधिकारित्व मात्र ब्रह्मात्मतत्त्वविद्योदयात्प्रागप्रामा य प्राप्तिरिति नाध्ययनविधिविरोध इति भावः १६

द्वितीयं विकल्पमि ापत्या प्रत्य चष्टे

नेति नेतीति देहादीन पोह्य त्म ेषि
अवि े ात्म बोध र्थ तेन विद्य निवर्ति ता १

ने ीति नेतिनेतीति वीप्सार्थया श्रुत्य देह दीन्मिथ्याद्दष्ट्य त्मात्मीयभ वेन गृहीतानशेषानपोह्य प्रतिषिध्य प्रतिषेधावधिभूत आत्मावशेषितः सत्यस्य स त्य मित्य दौ किमर्थमित्यत अ ह अविशेषात्मबोधार्थमिति अविशेषश्चास वात्मा चेति तथा तस्य बोधो निर्विशेषचित्सदान दस्वभावाविर्भावस्तदर्थमित्यर्थः पर गर्थेष्वपोहितेषु तदवधित्वेन प्रत्यगर्थ एवावशि यत इति प्रत्यक्तत्त्वबोधार्थमित्युक्त भवति बोधेसति किं स्यात्तदाह तेनेति यन्निब धनो देहादा वात्माभिमानः कर्माधिक रहेतु साऽविद्या तेन बोधेन निवर्तिता बाधितेत्यर्थ अतो निमित्ताभावान्नैमित्तिकाभाव इति य येनात्मतत्त्वज्ञानवतो न कर्मविधिप्रतिपत्तिरिति तत्प्रति फलवद्विज्ञानजनकत्वाभावात्कमका डस्य तद नीमप्र मा यमिष्टमेव निवृत्ततीव्रक्रोध प्रत्यभिच रविधिशास्त्रवदिति सर्वमनवद्यम् १

ननु निर्विशेष त्म ोधेन सकृद्नि वर्तिताप्यविद्या पुनरुद्भवि यति तत्

कर्माधिकारहेतुसंभवात्कर्मविधिः स्य च्छुक्तितत्त्वावगमात्तदज्ञाननिवृ त्तावपि पुनस्तत्र समया तरे रजतभ्रमोदयोपल भ दित्याशङ्क्याह

नि त्त सा कथ भूय प्रसूयेत प्रमा
अ त्ये वि षेऽपि प्रत्यग त्मनि केवले १८

नि त्तेति प्रमाणतो निवृत्ता प्रमाण भिना द धा साऽविद्या भूयः पुन कथ प्रसूयेत जायेत नहि मृता द ध च भार्य पुनः प्रसवायोद्भवति तद्वदित्यर्थः अविद्या तर जायेतेति चेत्तत्र वक्त यं किं निनिमित्तं जायेत निमित्त द्वा नाद्यः अकारणकार्योत्पत्ताव तिप्रसङ्गात् द्वितीये किमात्मा निमित्तमनात्मा वा नाद्य इत्याह असत्येवेति अविशेषे केवले इत्यनयोर्व्याख्यान०य ख्येयम व. यद्वाऽविशेष इत्युक्ते मूर्त्यादिकतिपयविशेषाभावेऽपि विशेषान्तरशङ्का स्य दत उक्तं केवल इति तावत्युक्त एकाकिनोऽप्यात्मनः प्रयत्नादिगु णयोगित्वविशेषशङ्का स्यात्तन्निवृत्तयेऽविशेष इत्युक्तम् तथाचाविशेषे केवले प्रत्यगात्मनि सर्वा तरे परमार्थवस्तुनि साऽविद्य ऽसती एव न सत्तां लभते असहायस्यात्मनः कूटस्थस्य कर्तृत्वानुपपत्ते अविद्या तरसहायाभ्युपगमे चा यो य श्रयोऽनवस्था वा प्रसज्येतेत्यर्थः अपिश देन पक्ष तरं निरस्यते अनात्म यप्यसत्येव साविद्या कार्य स्यानात्मनोऽविद्य हेतुत्वानुपपत्तेरित्यर्थः शुक्तिकादौ तु रजतादि विक्षेपोपादानांशस्यैव विद्याशक्तिभेदस्य ज्ञानेन निवृत्त्यभ्युपगमात् मूल ज्ञानस्य त न्गन तशक्तिमतो विद्यमानत्वात्तद्वशात्पुनर्भ्रा त्युदयो पपत्तेर्दृष्टा तो विषम इति द्रष्टव्यम् १८

अविद्याया. पुनरनुद्भवस धनफलमाह

न चेद्भूय प्रसूये कता भो ति ा थम्
द ाति च वि ाने स द्विद्य ऽसह यिका १९

नचेदिति पादत्रयेण सदेव ब्रह्मैवाहमस्मीति विज्ञाने विशिज्ञानेऽपरोक्षानुभवे सति भूयः पश्चान्न चेदविद्या प्रसूयेतेति कर्ता भोक्तेति धी कर्माधिकारनिमित्तभूता कथं स्यान्न स्यादेवेत्यर्थः चकार कर्तृत्वादेः पारमार्थिकत्वशङ्कानिवृत्त्यर्थं कर्तृत्वादे पारमार्थिकत्वे विद्य निवर्त्यत्वायोगादनिर्मोक्षप्रसङ्ग इति भावः ज्ञानकर्मसमुच्चय निराकरणमुपसंहरति तस्मादिति यस्माद्विद्य यामुत्पन्नाया कर्म संभवः सिद्धस्तस्मादसहाया केवलैव विद्य कैवल्यहेतुरित्यर्थः १९

विद्याया सहकारिनिरपेक्षत्वेनैव मोक्षहेतुत्वमिति युक्त्योक्तेर्थे श्रौत लिङ्गमुपोद्बलयति

अत्यरेचयदि‹ ‹ो य श्रुत्यातएव हि
कर्मभ‹ ‹ो मा तेभ ए दिति व जि ‹म् २
अ ‹त्व ‹ स्मा‹ ‹ज्य कर्म भि

अत्यरेचयदिति तैत्तिरीयोपनिषत्सु सत्यं पर पर सत्य मित्यु पक्रम्य सत्य तप अ दिम नसा तानि कर्माणि श्रेयःसाधन वेन निर्दि य तानि वा एता यवराणि तपांसी ति ते ां फल्गुफलत्वेन निन्दा मभिधाय यास इति ब्रह्मेत्युक्तो यास एवात्यरेचय दिति तत्त्व ज्ञाना तरङ्गभूत सं यासः स्तूयते तस्मान्निन्दितस्यानुपादेयत्वा त्स्तुतस्य चोपादेयत्व त्कर्मस पेक्षत्वे मोक्षस्य सं यासविधानानुपपत्ते सस यासमात्मज्ञानमेव मोक्षसाधनं ग यत इत्यर्थः अतएव हीति ज्ञानस्य फले कर्मनिरपेक्षत्वादेवेत्यर्थः लिङ्ग तरमाह ए व दिति वाजिनाममृतत्व श्रुतमिति वाजसनेयिनामुपनिषत्सु अ त्म नि खल्वरे दृष्टे श्रुते मते विज्ञात इद सर्वं विदित मित्युपक्र य द्वय मात्मतत्त्व दुन्दुभ्यादिदृष्टान्तप्रब धेनोपपाद्य उक्त नुशासनासि मैत्रे

येतावदरे खल्वमृतत्व मिति ज्ञानस्यैवामृतत्वसाधनत्वावधारण श्रुत तस्य कर्मानपेक्षायां लिङ्गमन्यथैतावदित्यवधारणार्थवचनानुपपत्तेरित्य र्थ. अमृतत्वस्य तु नाशोऽस्ति वित्तेने ति च तत्रोक्तो वित्तसाध्यस्य कर्मणोऽमृतत्वसाधनत्वाभावे लिङ्गमनुसंधेयम् नच विद्यां च विद्य चे ति समुच्चयविधानविरोधः तस्य देवतोपासनज्ञानकर्मसमुच्चयविष यत्वात् अन्यथा हिर मयेन पात्रेण अग्ने नय सुपथे ति च मार्ग याचनाद्यनुपपत्तेरिति सर्वमनवद्यम् न कर्मणा न प्रजया धनेन त्य गेनैके अमृतत्वमानशुः त्याग एव हि सर्वेष मोक्षसाधनमुत्तम म् त्यजेतैव हि तज्ज्ञेयं यक्तु प्रत्यक् पर पद मित्यादिशास्त्राद्य स्म त्यागोपलक्षितमात्मज्ञ नमेव मुक्तिसाधनं तस्मादिति प्रकृतार्थ मुपसंहरति तस्मात्त्याज्यं कर्म मुमुक्षुभिः साधनचतुष्टयसंपन्नैर त्म तत्त्वजिज्ञ सुभिरित्यर्थः विविदिषोरपि नास्ति कर्मावसर कुतो विदुष इत्यभिप्राय २

अत्रार्धश्लोकोऽधिकः प्रागुक्ताधिकार्धेन सख्येयः तदेव मुमुक्षु णा सर्वकर्मसं यासपूर्वकज्ञाननिष्ठेन भवितव्यमिति य येनोपपाद्ये द नीं परोक्तदृष्टा तमनूद्य दूषयति

अ्ग्निष्टो वदि तत्रेद भिधीयते २१

अ ग्निष्टोमवदिति अर्धश्लोकेन २१

दूषणमुच्यत इति प्रतिज्ञाय श्लोकेन दूषणमाह

नैक र ाध्यत्वात्फ ा यत्व मे
विद्या द्वि री ो द ा ो वि मो भवेत् २२

नै ति कर्मणोऽग्निष्टोम देरनेककारकसाध्यत्वान्नियतद्रव्यमन्त्रत न्त्रप्रयोगस ध्य वादितियावत् तथा फल यत्वात्फलभेदवत्त्वात् यदेव

विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तर भवती तिश्रुते र्विद्याद्वारा वार्यवत्तरफलविशेषसंभवाच्च युक्ता सहकार्यपेक्षेत्यर्थः नैवं विद्याया इत्याह विद्येति तद्विपरीता कर्मस्वभ वविपरीतस्वभावेतियावत् यथा वस्त्वधीनप्रमाणनिब धनाया निरतिशयमोक्षैकफलाय विद्या या न सहकार्यपेक्षा युक्तेत्यर्थः यतएवं स्वभावभेदः कर्मविद्ययोर तोऽग्निष्टोमन्ष्टा तो विषमो दार्ष्टान्तिकाननुरूपो भवेदित्यर्थः २२

वैषम्यमेवोपप दयति

कृष्यादिवत्फलार्थत्वाद यकर्मोपबृहणम्
अग्निष्टोमस्त्वपेक्षेत विद्या य त्कमपेक्षते २३

कृ या दिवदिति अग्निष्टोमः सातिशयः स यफलार्थत्वाद य कर्मोपबृंह ाम यैः कर्मभिः सहकारिभिविहितोद्गीथाद्यङ्गसंश्रितोपासना दिरूपैरुपचयमपेक्षेतेति योजना तत्र दृष्टा तः कृष्य दिवदिति कृषि वाणि ्या ौ फलोपचयार्थं साधनविशेषोपचय प्रसिद्ध इत्यर्थः विद्या तु निरतिशयफलत्वाद यत्सहकारिभूतं कं वस्त्वपेक्षते न किमपीत्यर्थः २३

यदुक्तमकुर्वन्विहित कर्मेति प्रत्यवायस्मृतेश्चेति तत्राह—

प्रत्यव यस्तु तस्यैव यस्य हकार इ यते
अहक रफ र्थित्वे विद्येते नात्मवेदिन २४

त्यवायस्ि ति अस्य कर्मणोऽह कर्ता एतत्कृत्वेद फल भोक्ष्य इति यस्याहकार इ यते इष्टो भवति स्वाभाविको वर्तत इति यावत् तस्याधिकृतस्य विहिताकरणे प्रत्यवायो भवदित्यर्थः अ त्मवेदिन आत्मतत्त्वज्ञाननिष्ठस्य तु अहंकारफल र्थित्वेन विद्येते विषयाभावादतो निमित्ताभावान्न प्रत्यव यस्तस्येत्यर्थः २४

विद्यैवाज्ञानहानाय न कर्मप्रतिकूलत इत्युपक्रम्येयता ग्र थेन कर्मणः स्वातन्त्र्येण वा ज्ञानसहकारितया वा सर्वथा न साक्षा मोक्ष हेतुत्वमस्तीत्युपपाद्य ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रम इति परमप्रकृतमुपसंहरति

तस्मादज्ञ नहानाय सस रविनिवृत्तये
विद्याविधानाय प्रार धोपनिषत्त्वियम्   २५

तस्मादिति विद्यायाः कर्मनिरपेक्षत्वं त च्छ दार्थः अज्ञान हानायानाद्यज्ञाननिरासिसिद्धयेऽपेक्षितब्र विद्या विधातुं संपादयितुमयं परोपनिषद्वेदा तभागः प्रार ध इति योजना अज्ञानहानस्य विशेषणं संसारविनिवृत्तय इति संसारस्य विनिवृत्तिः सम्यङ्निवृत्तिर्यस्मादिति विग्रहः अक्लीबत्वमार्षम् अत्रोपनिष च्छ द्रो लक्षणया वेदा तग्र थेषु प्रयुक्तः २५

तर्हि कोऽस्य मुख्योऽर्थ इति विवक्षाया ब्रह्म विद्य ख्यं श दसा मर्थ्यं दर्शयन्नुपनिप च्छ द्व्युत्पाद्नेनापि स्वतन्त्रैव विद्या मोक्षहेतुरिति सूचयति

देरुपनिपूर्वस्य व्वि पि चोपनिषद्भ त्
दीकर भ वाच्च गर्भादे श तनात्तथा   २६

सदेरिति षद्लृ विशरणगत्यवसादनेषु इति धातोरुपनीत्युप सर्गद्वयपूर्वकस्य क्विप्प्रत्यया तस्योपनिषदिति रूपम् अस्त्यत्र ध त्वर्थ त्रयम् तथाहि ये म दब्र विदस्तेषां गर्भज मजरादिकमुपनिषदयति शि थिलीकरोतीत्युपनिषदित्येकोऽर्थः जिज्ञासोश्चोप समीपे नि निश्चयेन ब्र गमयतीति द्वितीय तत्त्वविद तु गर्भादि नाशयत्येवेति

तृतीयः एवं स य ध त्वर्थयोगाद्विद्यैवोपनिषच्छ द्वाच्या तादर्थ्या द्ग्र थोऽप्युपनिषदुच्यते लाङ्गलं जीवनमितिवदित्यर्थः २६ .

इति प्रथममुपोद्घातप्रकरणम्

तिषेध रणम् २

तदेवं मुमुक्षोर्मोक्षसाधनब्रह्मात्मविद्याप्रतिपत्तये वेद तारम्भ उपपद्यते इति स्थिते पुनराशङ्क्यते ननु विद्योपदेशाय वेदा तारम्भस्तदोपपद्यते यदि विद्योदयः संभाव्येत स इहात्मनि संसारित्वग्राहकप्रत्यक्षादिविरोधाद्वाक्यशतेनापि नोत्पादयितुं शक्यते, असंजातविरोधितया प्रत्यक्षादेर्बलवत्त्वात्तदुपजीविनश्च गमस्य दुर्बलत्वात्कथंचिदुत्पन्नापि विद्या यदि प्रमाणसिद्धं संसारं बाधेत तर्हि प्रत्यगात्मनोऽपि ब्रह्मरूपत्वं कथं प्रत्यक्षानुभवो न ब धेतेति अत उत्तरं वदति

प्रतिषेद्धुमशक्यत्वा तिनेतीति शेषि म्
इद न हमिद न हमित्यद्ध तिपद्यते १

प्र ति द्धुमित्या दि नेतिनेतीति वीप्सया सकलदृश्यप्रतिषेधे शेषितमुर्वरितं यदात्मतत्त्वं तत्प्रतिषेधावधित्वेन प्रतिषेद्धुः स्वरूपत्वेन प्रतिषेधसाक्षितयाऽवस्थितं यतोऽतः प्रतिषेद्धुमशक्यत्वं दद्ध साक्षात्प्रतिपद्यते निःसंदि धमुपलभ्यत इति योजना उपल भप्रकारमभिनयति इदमिति इदं देहरूपं नाहम त्मा इदमिन्द्रियजातं मनोबुद्धिप्राणतदुपादानचेतनपर्यं तं नाहं किंत्वेषां प्रकाशकमव्यभिचरि स्वयंप्रकाशं कूटस्थमक्षरं यस्मिन्सर्वं जगदाश्रयेऽव्याकृताकाश

---

१ चैत यप्रकरणमिति टीका तरे पाठः

ओतश्च प्रोतश्च तदेव ह परमक्षरमिति प्रतिपद्यत इत्यर्थ. ानेन विद्या नोदेतीत्येषा शङ्का निराकृता प्रतिषेद्धुमशक्यत्वादित्यनेन तु यथ व्याख्यातेन बाध यो यत्वं दर्शितमिति विवेक्त यम् १

न वहं ब्रह्मेति ज्ञानमुक्तविधयोत्पन्नमपि न प्रतिष्ठां लभते देहे न्द्रियाद्यभिमानस्यानवरतमनुवृत्तेरित्याशङ्क्य तस्य प्रमाणमूलत्वाभावा द्बाधितानुवृत्तिमात्रस्याभासत्वान्न विद्याप्रतिपक्षत्वमित्यभिप्रेत्य वाक्यो त्थज्ञानस्य प्राबल्यमुपपादयति

अहधीरिद ेोत्था ाचार भणगोचरा
निषिद्धात्मोद्भवत्वात्सा न पुनर्मानता व्रजेत् २

अहधीरिति देहादावनात्म यात्मबुद्धिरहंधीरित्युच्यते स हं कर्तुरिदमंशात्पूर्वपूर्वाहकारवासनावासिता त'करणरूपादिदम त्मनः सक शादुत्थिताध्यासात्मिकेत्यर्थः स्वरूपतोऽस्या दौर्बल्यमुक्त्व विषयभेदादपि तदाह वाचार भणगोचरेति निरूप्यम ण स्वतः सत्ताहीनमपि यदपरोक्षव्यवहारगोचरतया गम्यते तद्वाचार भणमनृत जडानात्मरूप तदेव गोचरो विषयो यस्याः सा तथा यत एवमतो नेतिनेतीति शास्त्रेण निषिद्धो बाधित आत्मा स्वरूपमुद्भवः कारणं यस्याः सा निषिद्धात्मोद्भवा तस्या भावो निषिद्धात्मोद्भवत्वं तस्म दिति विग्रहः सा पुनरिदंधीरात्मयाथात्म्यज्ञानान तर मानतां प्रमाणत्वं न व्रजेन्न लभेत अवस्तुत्वादवस्तुजत्वादवस्तुविषय वाच्च स्वप्नावस्थवि शेषज्ञानवदि र्थ अतो वा योत्थज्ञानमेव प्रबलं नेतरदिति भावः २

इदानीं पौर्वापर्ये पूर्वदौबल्य प्रकृतिवदिति यायेन प्रथमोत्पन्नाया

अपि कर्ता भोक्तृत्यादिधिय उत्तरेण ब्रह्मात्मज्ञानेन बाध्यत्वमुप पादयति—

पूर्वबुद्धिमबाधित्वा नो र जायते मति
शिरेक स्वय सिद्ध फलत्व त्स न बाध्यते ३

पूर्वबुद्धिमिति न शुक्त्यज्ञानज यां रजतबुद्धिमबाधित्वा शुक्ति धीरुत्तरोत्पद्यते एवं कर्त्रादिबुद्धिमबाधित्वा नात्मतत्त्वज्ञानमुत्तरमुत्प द्यते अत' प्रसक्तनिषेधात्मकत्वाद्बाधस्य पूर्वसमये उत्तरप्रसक्त्यभा वान्न पूर्वेणोत्तरस्य बाधः किंतु परेण पूर्वस्य प्रसक्तस्य बाध इत्यन वद्यम् पदार्थबोधे श दस्य माना तरस पेक्षत्वेऽपि न वाक्यार्थबोधे तदपेक्षा पदार्थबोधेऽपि यवह रमात्रस्यैवापेक्षत्वात्पूर्वबुद्धेर्व्यवहाराङ्ग त्वांशस्योत्तरेण त्मज्ञानेनाबाधनाच्च नोपजी यविरोधश्चेति द्रष्ट यम् किंचै पनिषद त्मज्ञ नमेव तत्त्वावेदकमत्य ताबाध्यार्थत्वादित्याह त्रशिरिति ब्रह्मात्माकारा तःकरणवृत्तिप्रतिफलितापरोक्षस्फूर्तिर्न्शि रित्युच्यते सचैकः पराभावेनोपलक्षितोऽद्वितीय इति यावत् स्वयंसिद्धः परनिरपेक्षसत्तास्फूर्तिकः स न बाध्यते उक्तैर्विशेषणैर्बाधायो यत्वा वगमात्फलत्वात् नहि फल बाध्यते तस्य सर्वज्ञानसाधारणत्वात्सर्व व्यवहारहेतुप्रकाशत्वाच्चेत्यर्थः नित्यसिद्धस्या यस्य फलत्वं विषया कारवृत्ति यक्तत्व पेक्षयोपचर्यत इति भावः ३

एवं ब्र ात्मज्ञानस्य वाक्यादनुत्पत्तिशङ्कामुत्प स्य प्राबल्योपप दनेन पूर्वप्रवृत्तप्रत्यक्षादिभिर्बाध्यार्थत्वशङ्कां चोन्मथ्येद नीं कथमिद मुत्पद्यतामिति वीक्षायां पदार्थपरिशोधनेनेति श्रौतन्ष्टा तेनोपपा दयति

इद ति क शो गो ादिदूषि म्

न द्र ध रको यद्वत्स्व त्मान प्रतिपद्य ४

इद वनमिति इदं शरीरमेव वनमिव वन रागद्वेषशोकमोहादिभि र्यांग्रतस्करादिस्थानीयैर्दूषितमाक्रा तमतिक्र य दिङ्मात्रमाचार्यादवगम्या वयव्यतिरेकालोचनया पदार्थशोधनेन देहादिकमनात्मतया त्यक्त्वा स्वमात्मानं सर्वानुस्यूतमनपोह्यं प्रतिपद्यते अहं ब्रह्मासीत्यौपनिषद पुरुषमवगच्छतीत्यर्थः यथा गा धारको ग धारदेशवासी पुरुषो बद्धचक्षुरेव तस्करैरानीय महावने निक्षिप्तः स धमोक्षार्थी तत्र क्रोशं कुर्व केनचित्कारुणिकेनोपल धस्तेन मोचितब धो दर्शितस्वदेशमागो ग्र म ग्रामं पृच्छन् पण्डितो मेधावी वनात्स्वदेश प्रतिपद्यते तथायमपि संसारी अविद्याराग दितस्करैर्मिथ्याज्ञानपटेन विवेकदृष्टिमाच्छाद्य स्वदेशाद्देहार यं प्रवेशितो ब धमोक्षार्थ कदाचित्केनचित्कारुणिकेनाचार्येण ब्रह्मविदा त्याजितमिथ्यादृष्टिपट. प्रतिबोधितस्वदेशब्र मार्गोऽ वय यतिरेकाभ्यां स्वयमूहमानः स्वमात्म नमधिगच्छतीत्यर्थः ४

इति द्वितीयं आत्म ज्ञानोत्पत्तिवि धिप्रकरणम् २

ईश्वर त्म करणम् ३

येय ब्रह्मविद्या प्रतिपादिता तस्या प्रक शमानं ब्रह्म किं प्रत्यगात्मनो भेदेन प्रत्येत यं तदभेदेन वेति द्वा सुपर्णा सयुजे त्यत्र भेदश्रवणात् अयमात्मा ब्रह्मे त्यभेदश्र णाच्च संदेहे निर्णयकारणं श्रौतं दर्शय ाक्यविषयमर्थं स्पष्टयति

ईश्वरश्चेद त्म न्न ीति धर ेत्
अ त्म ा चेदीश्वरोऽ ीति वि स नि ा १

ति ध रणमित्यन्यत्र

ईश्वर इत्यादिना ईश्वरो जगत्कारणत्वेनोपलक्षित. परमात्मा सत्यज्ञ नान तान दरूप' स चेदात्मभिन्नो मेर्वादिवद्विपयभूत' परोक्षो वा स्यात्तद सावीश्वरोऽहमस्मीति मुमुक्षुर्न धारयेदात्मानं तत्त्वतो न प्रतिपद्येत ततस्तत्त्वमस्यादिवचनविरोधः स्यात् आत्मेति रूप गच्छन्ति ग्राहयन्ति चे ति य यविरोधश्च स्यादित्यर्थः ईश्वर एवा त्माहमस्मि ना य इति चेद्धारयेद्विजानीयात्तदा न श्रुति यायविरोध इति योऽयम् सा विद्या तिरोहितभेदाकारप्रत्य ब्रह्मैक्यावलम्बिनी अ यस्या अविद्याया निवर्तिका समूलसंसारनिवर्तिकेत्यर्थ' ब्र वेद ब्रह्मै भवति ब्रह्मैव सन्ब्र ाप्येती त्यादिश्रुतौ ब्रह्मज्ञानस्य ब्र भावफलश्रवणाद यत्वपक्षे स्थितस्य नष्टस्य वान्यस्या यभावानुप पत्तेरैक्यज्ञानमेव फलवदिति तत्रैव शास्त्रतात्पर्यं न भेदे तज्ज्ञान स्याफलत्वात् अन्योऽसावन्योऽहमस्मीति न स वेदे ति भेददर्शनस्य निं दितत्वा भेदश्रुतेस्त्वनाद्यविद्याकल्पितभेदानुवादपरत्व न्न स्वार्थे तात्पर्यमिति भ वः १

इतश्चाभेदे वेदतात्पर्यमाह

आत्मनोऽ चेद्धर्म अस्थूल दयो ।
अज्ञेय ऽ किं तै दा त्वे यधीह्नुति २

अ न इति अस्थूलत्वादयो धर्माः प्रत्यगात्मनोऽ यस्य भिन्नस्येश्वरस्य चेन्मता इष्टाः स्युस्तदास्येश्वरस्यानात्मभूतत्वादज्ञेयत्वे ति मुमुक्षोरस्थूलत्व दिभि. श्रौतैर्धर्मै' किं स्यान्न किमपि स्थूलोऽह शोऽहमित्य दिस्वगतभ्र त्यनिवृत्तेरित्यर्थ यद त्वस्थूलत्वादिधर्मक ईश्वरोऽहमस्मीति ज्ञ यते तदा तस्याप्यात्म सति प्रतीचोऽ यधीह्नुति स्वात्म येव गृहीताया कृशस्थूलत्वादिधियो मोहमूलाया बाधसिद्धि फल स्य दित्यर्थ' २

कस्मिन्नाकाश ओतश्च प्रोतश्चे ति कार्यकारणात्मकजगदाश्र यप्रश्नोत्तरत्वेनाक्षरस्योपक्रमात् एतस्य वा अक्षरस्य प्रशासने गार्गि इति जगदीश्वरतया मध्ये परामर्शात् अदृष्टं द्रष्ट्रि त्यादिना तत्स्वभा वकथनपूर्वकम ते च एतस्मिन् खल्वक्षरे गा याकाश ओतश्च प्रोत श्चे त्युपसंहारादीश्वरपरता ब्रा णवाक्यस्याशेषस्यावधारित तत्र नान्यदतोऽस्ति द्रष्टृश्रोतृम तृविज्ञात्रि ति द्रष्टृत्वाद्युपलक्षितस्य प्रत्यगा मनोऽक्षरब्रह्माभेदश्चावधारित इताश्वरात्मनोरभेद एव शास्त्रार्थो यतस्तस्मात्प्रत्यगात्म यध्यस्तस्थूलत्वादिप्रतिषेधपरमिद वाक्यमास्थेय मित्यभिप्रेत्याह

मिथ्याध्य निषेधार्थं तोऽस्थूल दि गृ त म्
रत्र चेन्नि षेधार्थं शून्यता न हि तत् ३

मि थ्येति ततस्तस्मान्मिथ्याध्य साज्ञानमूलस्य निषेध र्थं निवृ त्त्यर्थं अस्थूलादिप्रत्यगात्मविशेषणत्वेन गृह्यताम् विपक्षे दोषमाह

रत्रेति अस्थूलादिव क्यं परत्र प्रत्यगात्मनोऽ यत्र स्थूलत्व निषेध र्थं चेत्स्यात्तदा हि निश्चितं शून्यतावर्णनमेव तत्स्याद त्मनो ऽ यस्य जडत्व त्तस्य च स्थौल्यादिधर्मयोगान्निषेध त:पातित्वे सतीश्व रस्येश्वरत्वायोगान्निषेधमात्रपरमेव वाक्य स्यादित्यर्थः तस्मादस्थूला दिधर्मकस्य नात्मत्वायोगादीश्वरमभ्युपगच्छतात्मैव सोऽभ्युपग त य इति भाव ३

किंच प्रत्यगात्मनोऽ यत्र स्थूलत्वादिप्रतिषेधे चाप्र सप्रतिषेधो नि फलश्चापद्येतेति दोष तरमाह

भुत्सोयदि च त्यग त्मन इ यते
ा मन भ्र इति च च ४

बु त्सो र ति यदि प्रत्यगात्मनो बुभुत्सोरात्मतत्त्वं बोद्धुमिच्छो ससारित्वेनाभिमतादात्मन इतियावत् तद यत्र देहेन्द्रियप्राणमनस्त द्धर्मनिषेध इ यते तदाऽप्राण इत्यादिवचनमनर्थकं निर्विषयं स्याद यत्र प्राण दिप्रसक्त्यभावात्प्रतिषेधस्य च दृष्टार्थत्वादित्यर्थ· ४

इति तृतीयं ईश्वरात्मप्रकरणम् ३

तत्त्व ान भा प्र रणम् ४

ननु यदिदमीश्वराभेदेनात्मनो ज्ञानं मोक्षसाधनमुक्तं तन्नोपपद्यते सचितानेककर्मसद्भावात्कर्मणां च फलावश्यंभावनियमात्तैः प्रतिबन्ध ंभव दिति तत्राह

अह त्य बीज दह य ति म्
नाह त्यय ह ु कथ कर्म रोहति १

अह त्ययेति अहमिति प्रत्ययोऽहंकारोऽनात्म यात्माभिम न लक्षण स बीजं कारणं यस्य कर्मणस्तदहंप्रत्ययबीज अहमिति प्रतीयते अ त्मा यस्मिन्न तःकरणे साभ से तदहंप्रत्ययवत्तस्मिन्नहंप्रत्ययवति स्थितं सचितं यत्कर्मजातं तन्न हं कर्ता भोक्ता किंतु ब्रह्मैवाहमस्मीति य प्रमाणजनित प्रत्यय· स एव वह्निस्तेनो ं द धं कथं पुनः प्ररोहति फलो मुखं जायेतेति योजना तथाच श्रुतिस्मृती क्षीयन्ते चास्य कर्माणि तस्मि दृष्टे परावरे ज्ञ नाग्निः र्वकर्माणि भस्मसा त्कुरुते तथे ति ज्ञानोदये ना तरायकतया मूलाज्ञानस्य विरोधादेव निवृत्तिसंभवात्तदा तत्कार्या त·करणस्यापि निवृत्तेराश्रयाभावे कर्मस्थित्ययोगात्कुतस्तेन मोक्षप्रतिब धशङ्केत्यभिप्राय·

ननु यथा ज्ञ नवतोऽपि भिक्षाटनादिकर्म सफलमुपलभ्यते तथ तस्माददृष्टफलमपि कर्म सफल स्यादिति कल्प्यत इति शङ्कते

द ेत्प्ररोह स्य ा यकर्मा स इ य े
ोधे कथ तत्स्य त्पृ ामो वस्तदु यताम् २

द व ेत्प्ररोह स्यादि ति परिहरति ना यकर्मा स इ यत इति नेति निषेध र्थः स भिक्षाटनादिविदुषो व्याप रोऽ यकर्मा अ यत्र प्रवृत्तं फलं कर्म कारणं यस्य सोऽ यकर्मा स इ यते ज्ञानावि रोधिप्रार धफलकर्मनिब धनं हि भिक्षाटनादि नैव विधलक्षणं तस्य ज्ञानविरोधित्वादित्यर्थः ननु ज्ञानादज्ञाननिवृत्त्या त मूलाहंकारनि वृत्तिद्वारेण तद श्रयकर्मनिवृत्तौ कथमार धमपि कर्म सिद्ध्येद्यन्निमित्त विदुषो भिक्षाटनादिकर्मप्रवृत्तिरिति पृच्छति पूर्ववादी तन्निरोध इति कर्माश्रयः प्रथमतच्छ दार्थः कर्म द्वितीयतच्छ दार्थः २

उत्तरमाह

देह र भस म य ज्ज्ञ न द्विषय त्वयि
अभिभूय फल कुर्या ि न द्भवेत् ३

देह दीति सद्विषय प्रमाणजनितत्वेन प्रबलमपि ब्रह्म त्मवि षयं ज्ञ नमभिभूय विदेहकैवल्यरूप त्फलात्प्रच्याव्य कर्म प्रार ध फललक्षणं स्वफल देहाभासजगदाभासरूपं त्वयि ज्ञ नवत्यपि कुर्या देव कुतः देहाद्यारम्भंप्रति समर्थत्वाद ते प्र र धकर्मफलभोग वसाने सति ज्ञानं प्रतिब धरहित समुद्भवेदुद्भूतं भवति वर्तमानकार्य संपादकाविद्यालेशमप्यपब ध्य विद्वांसं स्वाराज्ये स्थापयेदित्यर्थः ३

ननु प्रार धकर्मवशाज्ज्ञ निनोऽपि भोगः स्या त्वनार धकर्मतत्फ लयोस्तस्मिन्नवस्थितिरिति कथमुपपद्येत अज्ञानक र्यत्वाविशेष त्सर्वस्या ज्ञाननिवृत्तौ च पुनराश्रय भावेन वस्थ नाभावस्य समत्वादित्य शङ्क्य विशेषमाह

आर धस्य फ े ेते भोगो ज्ञ न च कर्मण
अविरोध योर्यु ो वैध र्य चे रस्य तु ४

आर धस्यो भोगो ज्ञानं चेत्येते हि यस्मादार धस्य कर्मणः फलेऽतस्तयोरविरोधो युक्त इतरस्य त्वनार धफलस्य संचितस्य क्रियम णस्य वा कर्मणो वैधर्म्ये वैपरीत्य विरोध एवेत्यक्षरार्थः अयंभावः ज्ञ न हि स्वकारण ज्जायमानं शरीरादिसापेक्षमेव जायते अशरीरस्याग तुकज्ञानासंभवात् शरीरादिकं तु न ज्ञानकारणादुत्प द्यते अन्यक रणस्या यहेतुत्वायोगात् अतः कैश्चित्कर्मविशेषैः शरी रविशेषे ज्ञानोत्पत्तियो ये स्वफलदानायार धे सति तमाश्रित्य ज्ञानहे तुकर्माणि ज्ञानम रभ त इत्यभ्युपगन्त यम् तथाच र धे देहे तद्भो गस्यावश्यंभावित्वाद्भोगप्रदकर्मारब्धशरीरमाश्रि स्वहेतुसमास दितं ज्ञानं स्वफलमज्ञाननिवृ त्तिं कुर्वदपि न सद्यो भोगैकनाश्यदेहारम्भक कर्म क्षिप्ताविद्यालेशं निवर्तयत्युपजी यविरोधित्वाभावादिति न र ध फलकर्मज्ञ नयोर्विरोधोऽनार धफलानां तु कर्मणामकर्त्रात्मतत्त्वज्ञा नोदयविरोधादेव कर्तृस्वभावनिवृत्तावाश्रय भावादभावोपपत्तेर्न ज्ञानस हावस्थानमुपपद्यत इत्यस्ति विशेष इति ४

ननु ज्ञ निनोऽपि चेद्भोगो देहार भककर्मनिब धनोऽस्ति तर्हि तस्य कद चिद्देहात्माभिमानसंभव स्तदुद्भूतदुरितप्रतिबन्धवशान्मोक्षानुपप त्तिरिति चेन्नेत्याह

देहा० ज्ञान ० देह ० न ध म्
अ ० े भ े स्य े पि मुच्यते
वम्दि द रि द्ध योगोऽ भिरीरित ५

देह त्मज्ञानवदिति　यथा विवेकविलक्षणस्य लौकिकस्य देहे मनु योऽहमित्यात्मज्ञानं　निःसंदि धमुपल धं　तथा मुख्यात्म येव देहाद्यहकारपर्य तसाक्षि यात्म येव　यस्य देहात्मज्ञानब धकमहमस्मि परं ब्र त्येवंरूपं निःसंदि धं ज्ञानं भवेत्स यथोक्तज्ञानवलाद्नर्थर शेरपनीतत्वा मुक्तिमनिच्छन्नपि बल मुच्यत एवेत्यर्थः　तथाचा विर्भूत त्मतत्त्वस्य　पुनर्देह भिमानहेत्वभावान्न मोक्षे कोऽपि प्रतिब ध इति भावः　तथाच श्रुतिः　भिद्यते हृदयग्रन्थिश्छिद्य ते सर्वसं शयाः　क्षीय ते चास्य कर्म णि तस्मि दृष्टे परावरे　इत्याद्या तथा स्मृतयोऽपि बीजान्य युपद धानि न रोह ति यथ पुन　ज्ञान द धैस्तथा क्लेशैर्न त्मा संब यते पुनः　यथा पर्वतमादीप्तं नाश्रयन्ति मृगद्विजाः　तद्वद्ब्रह्मविदो दोषा नाश्रय ते कदाचन　मन्त्रौ षधबले र्यद्वज्जीर्यते भक्षितं विषम्　तद्व सर्वाणि कर्माणि जीर्य ते ज्ञानिनः क्षणा दिति　ज्ञानिनः कर्मणा प्रतिब धाभावमुपपादितमुपसंहरति

तत इत्यर्धश्लोकन　सर्वमिदमिति प्रारब्धकर्माविरोधित्वोक्तिः सिद्धं श्रुत्यादिप्रम णसिद्धमित्यर्थः　प्रयोग उपपत्तिः　५

इति चतुर्थं तत्त्वज्ञ नस्वभावप्रकरणम्　४

बुद्ध्यपराध　रणम् ५

यदि प्र गुक्तरीत्या ब्रह्मात्मज्ञानममृतत्वं गमयेत्किमिति तर्हि सर्वै रहंब्रह्मास्मीत्यात्मरूपं न गृह्यते निस त एव सर्वेषां परमपुरुषार्था र्थित्वादित तत्राह

मूत्र शङ्को यथोदङ्को　हीदमृत यथा
कर्मन शभ　ज ोर त्मज्ञाना ह　था　१

---

१ इत्यहंप्रत्ययप्रकरणमित्य　त्र

मूत्राशङ्क इति अत्रेयमाख्यायिक उदङ्को नाम कश्चिदृषिर्भगवन्तं महाविष्णुं तपसा तोषयित्वा देवरक्षितममृतं प्रार्थितवान् तदा भगवता देवेन्द्रं प्रत्युक्तममृतमस्मै दीयतामिति इन्द्रस्तु विष्णो राज्ञां पालयन्नमृतकलशं नीत्वा मातङ्गवेषमास्थाय स्वबस्तिदेशे कलशमुपनिधायोदङ्काय दातुमारेभेऽसूयया माभवत्त्वस्यामृतपानमिति मन्यमानः तदुदङ्कोऽपि च डालमूत्रशङ्कया न जग्राहेति उदङ्को मूत्राशङ्कः सन् यथाभूतमेव प्रत्यक्षोपलब्धमप्यमृतं यथा नाग्रहीन्न मदभिलषितममृतमिदमिति न गृहीतवान् जातिनाशभयादिति योजना तथा जन्तोर्लोकस्य वर्णाश्रमोपाधिविहितकर्मनाशभयादात्मज्ञानस्य यथोक्तस्याऽग्रहस्तस्मिन्ननादर इत्युत्तरार्धयोजना पदार्थस्वरूपापरिज्ञानं विपरीतज्ञानं च श्रुत्युक्तात्मस्वरूपाग्रहणकारणमिति भावः १

ननु दृष्टा ते देवेन्द्रस्य वेषान्यत्वममृतकलशस्य च मूत्राशयस्थाननिवेशनं च जात्यन्तरमूत्रभ्रमोत्पादनेनामृताग्रहणकारणमासीन्न तथात्मनो ब्रह्मभूतस्य भ्रमकारणमस्तीत्यत आह

बुद्धिस्थश्चलतीवात्मा ध्यायतीव च दृश्यते
नौगतस्य यथा वृक्षास्तद्वत्संसारविभ्रमः २

बुद्धिस्थ इति अनाद्यविद्यया स्वात्मन्यध्यस्तबुद्धौ लिङ्गशरीरे अभिमानित्वेन स्थित आत्मा तस्यां बुद्धौ चलन्त्यां चलतीव दृश्यते न वस्तुतश्चलत्यविक्रियत्वात्तथा तस्यां ध्यायन्त्यां निश्चलीभूतायां ध्यायतीव निश्चल इव दृश्यते प्रतिभासते न वस्तुतो ध्यायति चलनाभावे तत्प्रतियोगिकस्य नैश्चल्यस्याप्यभावादित्यर्थः विकारवद्बुद्ध्यविवेकादादावेव संसार्यहमस्मीति विपरीतनिश्चयदोषाच्छ्रुत्यादिभिरीर्यमाणमप्यात्मनो ब्रह्मत्वं न गृह्णाति लोक इत्यभिप्रायः अविवे

काद् यथ प्रतिपत्तौ ~ । तमाह　नौगतस्येति　तद्वदिति दार्ष्टन्तिकोक्ति.　२

उक्तमेव प्रपञ्चयति

नौस्थस्य प्रातिलोम्येन नग ना गमन यथा
आत्मन ससृतिस्तद्वद्ध्यायतीवेति हि श्रुति　३

नौ स्थस्येति　जलस्थायां चल त्यां न वि स्थितस्य　जनस्य यथा नौगतिदि वैपरीत्येन जलाशयतीरस्थानां　नगानां वृक्षादीनां गमनं विभा यते उपाध्यविवेकात् तद्वदसंसारिणोऽप्यात्मनः संसृतिरनुभूयत इत्यर्थः　उक्तार्थानुवादिनीं श्रुतिं पठति　ध्य यतीवेति　हि श्रुति रिति　'स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीवेति श्रूयत इत्यर्थः　३

प्रपञ्चितदृष्टा तानुगु येन दार्ष्टा तिकं प्रप-चयन्नुदाहृतश्रुत्यर्थमाह

चैत यप्रतिबिम्बेन　यासो बोधो हि जायते
बुद्धे श दादिभिर्भासस्तेन मोमुह्यते जगत्　४

चैत यप्रवि-बेनेति　चैत यप्रतिबि बश्चिदाभासस्तेन　व्यासो हि यस्माद्बुद्धेर्बोधो विषयाकारा बुद्धिर्जायते अत　स्वाभासाविवेका ~छ दादिभिर्बुद्धिवृत्ति०यासविषयैः　इत्थंभावे तृतीया　विषयभूत देहाद्यात्मना भासो भासन　स्फुरणम त्मनो　भवतीति　शेष'　यदि श दादिनिर्भास इति पाठो लभ्यते तदा　बोधविशेषणम्　श दादे र्विषयस्य　निर्भासो　यस्मिंस्तथेति सुगमम्　येनैवमेकस्यां　बुद्धिवृत्तौ देहादिविषयचैतन्ययो　सश्लेष इव भवति तेनान्यो याविवे निमित्तेन जगज्जनोऽतिशयेन　तीत्यर्थ.　य । नौस्थ　पुरुषो　न वश्चलन न नुभ ति अचलत्सु च　वृक्षेषु　चलनमनुभवतीत्युपाधिसामर्थ्यादेव

बुद्धिस्थदेहाद्यात्मभावमिवापन्न आत्मा तदीय याप र न पृथगनुभवति तदाभासाविवेकात्तु चिद त्मनि विकारमारोपयन्ननुभवति मृषैवेत्येत द्ध्य यतीवेत्यादिश्रुत्योच्यते अत उपाधिसामर्थ्यात्संसारित्वविभ्रम इत्यभिप्रायः ४

एवमविवेकाधीने ससाराध्यासे विविक्तपदार्थस्य वाक्यादहंब्रह्मा स्मीति बुद्धिवृत्त्युदये मुक्तिः फलिष्यत्यत. पदार्थविवेकवत भा यं मुमुक्षुणेत्यभिप्रेत्याह

चैत यभास्यता॰मस्तादर्थ्यं च तदस्य यत्
इदमशप्रह ेन पर सोऽनुभवो भवेत् ५

चैत यभास्यतेति अहमोऽहंकारस्य चिदचिद्ग्रन्थिरूपस्य यच्चैत यभास्यता व्श्यता यच्च तादर्थ्यं चिदात्मनो विषयोपस्थापकत्वेन तच्छेषत्वमस्ति तदुभयमस्याहंकारस्य संबन्धि तस्मिन्निदमंशस्य प्रहाणे विवेके सति न भवेन्न स्य दि ति योजना तत्र योऽनुभवः साक्षी परिशिष्टः स परः परमात्मा वाक्यार्थभूतो भवेदित्यर्थः **यद्वा** अस्या हमोऽहंकारस्य चैत यभ स्यता जडता तादर्थ्यं च तच्छेषत्व च यद्य स्मादस्ति तत्तस्मादयमहंक रो नात्मेति वेद्यांशप्रहाणेन तस्मिन्नसदर्थ त्वाभिमानत्यागेन योऽनुभव' स पर आत्मेति निश्चयवा भवेदिति योजना **अथवा** स वाक्यार्थविषय' परः सर्वोत्तरोऽनुभवोऽहमोऽहंक र स्येदमशप्रह णेन पृथक्करणेन भवेदिति सब धः इदमनिदम त्मक स्याहकारस्य संब धी य इदमशस्तस्य स क्षिसाक्ष्या वयव्यतिरेकाग मापायितदवध्य वय यतिरेक लोचनरूपेण मननेनापबाधेसति अवशि ष्टांशोऽनपोह्य आत्मेत्यनुभवो भवेदित्यर्थः न वहमित्यवभासे इदमंश एव न चक स्ति यस्य प्रहाणेन परोऽनुभवो भवेदित्याशङ्क्याम ह

चैत यभास्यतेति ताद र्थ्यं चेति च सुषुप्त्यादावात्मनि भासमा नेऽ यहंकारस्यानवभासादनात्मत्वे निश्चिते सति जागरितादावागन्तु कचैत यभास्यता तस्य सिद्धा अतः प्रतिभ सते इदमश भावेऽपि चैतन्यभास्यत्वेन लक्षणेनास्तीदमाकारतेत्यर्थः तथा तादर्थ्यम यस्ति अ त्मनि कर्तृत्वभोक्तृत्वादिव्यवहार निर्वाहकतया अ त्मशेषत्वमस्ति य द्यस्मादेवं तत्तस्मादप्यनात्मत्वलक्षण इदमंशो विद्यते अतस्तत्प्रहाणेन ब्रह्मात्मानुभवो भवेदिति सर्वं समञ्जस १

इति पंचमं बुद्ध्यपराधप्रकरणम् ५

विशेषापोह रणम् ६

पदार्थविवेकवतो वाक्यादहंब्रह्मेति ज्ञानं भवतीत्युक्तम् तत्राह 'मित्यत्रेदमंशप्रहाणेन साक्षितत्त्वस्य शोधनप्रकारः सूक्ष्मोपायो निदिष्टः तत्रासमर्थप्रति स्थूलोपायेन पदार्थशोधनप्रकारमुपदेष्टुं प्रकरणमार भते तत्र यत्स्वरूपप्रहाणम तरेण ज्ञातुं न शक्यते यथाग्नेरौष्ण्यं तस्य स्वरूपत्वादेव न विशेषणत यद्यपि तथापि तथाविधस्य क्वचिद्विशेषणत्व यवहार कल्पितभेदमाश्रित्येति स्थिते आत्मनि सति सत्ताचैत यान न्दानामनपायान्न तेषां विशेषणत्वं किंतु स्वरूप त्वमेव कृश. स्थूल कृष्णो गौरोहं मनु यः श्रोता द्रष्टा वक्ता कामी क्रोधी ज्ञानी कर्ता भोक्ता सुखी दुःखीत्येवंविधानि विशेषणानि नात्मनः सत्त दिवत्स्वरूपभूत नि सत्यप्यात्मनि सुषुप्त्यादौ तेषामभा वादित्येवमात्मनः पृथगुद्धृत्य तस्य कूटस्थतावधेयेत्यभिप्रेत्य पृथग्भू तस्य विशेषणत्व भ वे दृष्टा तमाह

१ मूत्राशङ्कप्रकरणमित्य यत्र

छित्त्वा त्यक्तेन हस्तेन स्वयं नात्मा विशिष्यते
तथा शिष्टेन सर्वेण येन येन विशेष्यते ॥ १ ॥

छित्त्वा त्यक्तेनेति यथायं दृष्टान्तस्तथा येन येन मनुष्यत्वादिना विशेष्यते तेन सर्वेण शिष्टेन त्यक्तहस्तातिरिक्तेन पादादिना वा स्वयमात्मा न विशिष्यते यथा हस्तच्छेदानन्तरं हस्तवानहमिति न विशिष्टप्रत्ययः क्रियते एवमेव पादादिमान्मनुष्योऽहमित्यादिविशिष्टप्रत्ययो न कार्य इत्यर्थः ॥ १ ॥

देहद्वयसमवायिधर्माणामात्मनि व्यभिचारैरात्मा विशिष्य न प्रत्येतव्य इत्युक्तमनूद्य फलितमाह

तस्मात्त्यक्तेन हस्तेन तुल्यं सर्वं विशेषणम्
अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वैर्विशेषणैः ॥ २ ॥

तस्मादिति अनात्मत्वेन त्यक्तेन हस्तेनेति संबन्धः विमतानि विशेषणानि नात्मस्वभावभूतानि विशेषणत्वात् छित्त्वा त्यक्तहस्तवदित्यर्थः यस्मादेवं तस्मात् ज्ञो ज्ञानवान्विवेकज्ञानवान्सर्वविशेषणैर्मुक्तश्चित्सदानन्दमात्रात्मक एवावशिष्यत इत्यर्थः ॥ २ ॥

उक्तन्यायेन विशेषणानामनात्मत्वेऽपि नात्मनस्तद्वियोगोऽस्ति आगमापायाभ्यां संबन्धैरन्तर्यादित्याशङ्क्याह

विशेषणमिदं सर्वं साध्वलंकरणं यथा
अविद्याध्यासतः सर्वं ज्ञात आत्मन्यसद्भवेत् ॥ ३ ॥

विशेषणमिदं सर्वमिति इदं सर्वं विशेषणं यथालंकरणमलंकार्यसंबन्धेऽपि न तत्तादात्म्यतद्धर्मत्वबुद्धिविषयस्तथा साधु शोभनं युक्तमिति यावत् इतरथा आगमापायानुपपत्तेरित्यर्थः तर्हि कुतो

मनुष्योऽहमित्यादौ ताद त्म्य वभासस्तत्र ह अविद्याध्यासत इति मोहादेव तथ वभास इत्यर्थः यस्मा दविद्यय ध्यस्तमेवात्मनीद सर्वं विशेषणमतो ज्ञाते आत्म यविद्यानिवृत्तावसत् बाधितं कालत्रयेऽप्य विद्यमानं भवेत्तथा निश्चितं भवेदिति योजना ३

ज्ञात आत्मनीत्युक्ते ज्ञेयत्वमात्मन उक्तमिति शङ्का स्यात् ज्ञेयत्वे च विशेषणादिवदनात्मत्वप्रसङ्ग इत्याशङ्क्याह

ज्ञातैव त्मा सदा ग्राह्यो ज्ञेय त्सृ य के ल
अहमित्यपि यद्ग्रा यपेताङ्गसम हि तत् ४

ज्ञातैवेति ज्ञेयमुत्सृज्य दृश्यांशापोहं कृत्वा यो ज्ञाता सदा सर्वस्य स एव त्मा न ग्र ह्यांश इति ग्राह्योऽ यवसेयः किंलक्षण. केवलो ज्ञातृत्वविशेषणेनापि रहित इत्यर्थ ज्ञातृत्वाद्युपलक्षितं चि मात्रमलुप्तप्रकाशस्वभावतया सर्वानुस्यूतं वस्त्वात्मेति विवेकवतो निश्चितप्रत्ययो भवेदिति भावः अहमित्यनुभूयमानत्वात्कथं ज्ञातै वात्मेत्युच्यत इत्यतआह अहमित्यपीति यदपि इदमहमिति ग्राह्य मात्मरूपं म यसे तद्व्यपेताङ्गसमं छिन्नहस्ततुल्यं हि एव तत्सुपुत्या दावात्म यवभासमानेऽप्यहमित्यनवभासनादहमो व्यभिचारित्वे सत्या त्मदृश्यतयात्मत्वायोगादित्यर्थः ४

आत्मनोऽहंप्रत्ययग्राह्यत्वाभावे चक्षुरादेरप्यविषयस्य कुत सिद्धि रिति मु धशङ्क दृष्ट्वा तेनापाकुर्वन्नात्मनोऽ यनिरपेक्षां स्वतःसिद्धि स धयति

यावा स्य दिदम ो य स तोऽ यो वि षणम्
वि क्षयो यत्र सिद्धो श्वित्रगुयथा ५

ाव नेति अहमित्यत्र यावांश्चिदवभ स्यत्वलक्षणेनेदमशो योऽहंकारादिर्यत्र विशेषणं स्याद्यस्मि स्वानुगतप्रतिभासे प्रत्यगात्मनि विशेष यवहारहेतुः स्यात्स प्रत्यगात्माऽ यो विशेषणत्वेनाभिमतात्तद हक रादेः परो विशेषप्रक्षयश्च सर्वेषां विशेषाणां प्रक्षयो याव्रत्ति र्यस्मिन्निति युत्पत्तेर्निर्विशेपश्च एवंरूपः स्वतःसिद्धोऽ यनिरपेक्ष एव सिद्धः स्फुर वर्तत इति पदयोजना यथा देवदत्तो विशेपणभूता याश्चित्रगोर यस्तत्संब धात्प्रागेव सिद्धो न चित्रगोः सब धं स्वसिद्धिं प्रत्यपेक्षते तथात्माप्यहकारादिसब धात्प्रागेव स्वमहिम्ना सिद्धो नाहं कारादिकं स्वसिद्धावपेक्षत इति ष्ट तदार्ष्टान्तिकसगतोऽर्थः ५

न वहमोऽनात्मत्वे कथमहं ब्रह्मेति त दात्म्यश्रुतिरुपपद्येतेत्याश ङ्क्याऽ यस्त हंकारस्य मूलनिवृत्त्यर्था श्रुतिर्नाहंक रस्यात्मत्वप्रतिपत्त्य र्थेति परिहरति

इदमशोऽहमित्यत्र त्य ज्यो नात्मेति पण्डितै
अहब्र ेति शि ाशो भूतपूर्वग ेर्भवेत् ६

इदमशोऽह मिति अहमित्यत्राहकारावभासे य इदमंशः स नात्मा दृश्यत्वादिति निश्चित्य पण्डितैस्त्य ज्यः तस्मिन्नात्माभिमानो न कार्य इत्यथः त र्हि कथं श्रुतिनिर्देशस्तत्राह अहमिति अहब्र ह्मेति वाक्य र्थनिष्ठ यां योऽहंकारांश उल्लिख्यते स भूतपूर्वगतेर्हेतो र्भवेत् भूता संजाता पूर्व गतिः प्राप्तिस्तस्या इति विग्रहः अहंकार लक्ष्यं वस्तु तत्साक्षिरूपमहमिति श्रुत्योल्लिख्यत इत्यर्थः ६

इति ष ं विशेषापोहप्रकरणम् ६

१ इति छिन्न करणमिति वा

ारू र मू

एव कृता य यतिरेकस्य परिशोधितपदार्थतत्त्वस्य वाक्यादेव क्यार्थ ानमुपपद्यत इत्युपपत्त्या निर्धारितमर्थं स्वानुभवा ष्टम्भेन द ीकर्तुं प्रकरणान्तरमारभते -

बुद्ध्य रू द व यते
ा द र श्च रि ग १

बुद्ध्य रूढ मित्यादिना यस्म मया सर्वमध्यात्ममधिभूतम धिदैवमित्यादिलक्षणं यत्र तत्र वा जाग्रत्स्वप्नयोरिहलोकपरलोकयोर्वा स्थित प्रत्यक्ष दित. शास्त्रतो वा यदुपलभ्यमस्ति तत्सव बुद्ध्यारूढ बुद्धिवृत्तिक्रोडीकृतं सदा दृश्यते प्रक श्यते तस्मादह सर्वदृश्यविल क्षणत्वात्परं प्रपञ्चातीतं ास्मि सर्वज्ञः सर्वार्थप्रकाशकः सर्वगोऽपरि च्छिन्नश्चास्मीत्यर्थ १

ननु कथमेतावता सर्वज्ञत्व पुरुषा तरबुद्ध्य रूढेर्थे पुरुषा तरस्यानुभव रणयोरसंभवादेकस्य त्मन सर्वार्थप्रकाशकत्व ासिद्धेरित्यत अ ह

य द्धिचारा ाक्षी तद्वत् रे पि
नै ापोढु न व दा क्य स्मात् रो हम् २

थ त्मेति आत्मनि सर्व यवहारप्रवर्तकतय अ त्मसब न्धिनी बुद्धिरात्मबुद्धिस्तस्य श्चार प्रचारो येषु ते आत्मबुद्धिचारा आध्यात्माधिदैवस्थूलसूक्ष्मदेह त्मकास्ते । साक्षी स्फोरकोऽह यथा तद्वत्तथा परेषु परकीयबुद्धिचारे वप्यह साक्षी साक्षिभेदे प्रमाणाभा वात् म येव सकल जात मयि सर्वं प्रतिष्ठितम् मयि सर्वं लय याति तद्ब्रह्माद्वयमस्म्यह मित्यादि तेर्मय्येवैकस्मिंश्चिदेकरसे

अ त्मनि सर्वप्रमातृतद्बुद्धितत्प्रचारगोचरस्य प्रपञ्चस्य कल्पितत्वावग माच्च युक्तं मम सर्वज्ञत्वादीत्यर्थः यस्मादेवमहं सर्वसाक्षित्वेन सर्वा धिष्ठानत्वेन च सर्वज्ञः सर्वगतश्च तस्मादपोढुमयमस्य द्रष्टा न भव त्यत्र स नास्तीति वा निराकर्तुं नैव शक्यः केनचित् नचैवाद तुं ज्ञ नेन क्रियया वा प्रकाशयितुमुत्पादयितुमाकष्टु वा शक्यो हि यस्मादह ग्र ग्राहकादिप्रपञ्चविलक्षणस्तस्मात्पर परमात्मैवेत्युपसंहारः २

ननु बुध्य रूढ चेत्सर्वं प्रकाश्यते क्षेत्रज्ञेन तदा दर्शनक्रियाया कर्तृ त्वाद्विकारित्वादिदोषप्राप्तेस्तस्यानात्मत्वप्रसङ्ग इतिशङ्कां निरस्यति

विकारित्वमशुद्धत्व भौतिकत्व न च त्मन
अशे द्धिसाक्षि॒ द्बुद्धिव ल्पवेदना ३

विकारित्वमि ति आत्मनो न विक रित्व बुद्धिवत्सावयवत्वा भावात्सर्वविकारसाक्षित्वाच्च ततएव नात्मनोऽशुद्धत्वं क्रियागुणयो गित्वमस्ति सकलगुणक्रियावद्वस्तुस क्षित्वाच्च न पि भै तिकत्वमा त्मनो रूप दिहीनत्व त् किंच नात्मनो बुद्धिवदल्पवेदना यथा बुद्धेर्बुद्धितत्ससर्गादिविषया वेदनास्ति नैवमात्मनोऽशेषबुद्धिसाक्षित्वा सर्वबुद्धिस्वरूपतद्विकार दिसाक्षित्वादित्यर्थः ३

यदि निर्विकार एव त्मा कथ तर्हि स सर्वार्थप्रकाशक इत्युच्यत इत्याशङ्क्य लोकप्रसिद्धदृष्टान्तेन निर्विकारस्यैव प्रकाशक त्वमुपपाद यति

मणौ कार ते यद्वद्रक्ताद्या र तपे
मयि श्य म नेव । ४

णाविति मणौ स्फटिकादिलक्षणे जप कुसुमादिरूप रक्ता द्याकारता आतपे सूर्यालोके सत्येव प्रकाश्यते गृ ते यद्वत्तथा मयि

जिघत्से ति　खादितुमिच्छा जिघत्सा प तुमि॰　पिप स अन्यत्प्रसिद्धमशरीरत्वादित्युपलक्षणमप्राणत्वादमनस्त्वाच्चेत्यर्थः तथा चोक्त प्राणस्य क्षुत्पिपासे द्वे मनसः शोकमोहकौ जरामृत्यू शरा रस्य षड्र्मिरहित' शिव इति　४

इदानीमनुक्तसकलेन्द्रियवृत्तिप्रतिषेधोपलक्षणतया स्पर्शरसनसंब ध प्रतिषिध्याविर्भावतिरोभ वहीनतया विशुद्धचिद्रूपत्वमुक्तमुपसहरति

अ　शत्व　मे स्प शिन जिह्वत्वाद्रसज्ञ
नि॰ विज्ञ नरू　न ज्ञ ने न मे　द　५

अस्पर्शत्वादिति स्पर्शनेन्द्रियरहितत्वादित्यर्थः ५

आत्मनो दृष्ट्यादयो न स तीत्युक्तेऽर्थे उपपत्तिमाह

या तु स्या म नसी त्तिश्च क्षु क रूपरञ्जना
नित्यमेवात नो द ा नित्यया दृश्यते हि सा ६

य तु स्यादिति चाक्षु का चक्षुर्द्वारजनिता रूपरञ्जना रूपाकार कारिता या तु म नसी वृत्तिः स्यात्स्य च्छ दो भवतीत्यर्थे एवंविधा वृत्तिरस्ति स त्मरूपया नित्यया दृष्ट्या चैतन्यप्रकाशलक्षणया नित्यमेव दृश्यते प्रक श्यते हि प्रसिद्धमनुभवसिद्धमेवैत दित्यर्थः ६

तथ च दृष्ट्य दयश्चिद त्मीयास्तद्दृश्यत्वाद्यो येन दृश्यते न स तदीयो यथा रूपादिरिति सिद्धम त्मनो दृष्ट्यादिराहित्येन शुद्धत्व दी त्यभिप्रेत्य चक्षुर्द्व रकवृत्तावुक्त यायं वृत्त्य तरेष्वतिदिशति

तथा येन्द्रिययु या वृत्तयो विषयाञ्जना
स्मृती रागादिरूपा च केवला तर्मनस्यपि ७

तथे ति विषयाञ्जनविषयोपाधिका' विषय कारा इति यावत् याच केवला चक्षुरादिद्वारनिरपेक्षा अ तर्मनसि शरीरा तर्वर्तिनि चित्ते स्मृतिः रागादिरूपा सापि पूर्वोक्तयात्मदृष्ट्या दृश्यतइत्य वयः ७

किंच स्वप्नावस्थायां विद्यमाना मनःपरिणामरूपा विषयाक र वृत्तयस्ततो यतिरिक्तस्यैव द्रष्टुर्दृश्या यथा संप्रतिपन्नास्तथा जाग्रद्दृश्या अपि दृश्यत्वात्स्व यतिरिक्तस्यैव द्रष्टुर्दृश्या इत्य ह

ान स्तद्वद स्य दृश ते वृत्तय
द्रष्टुर्दृ ो नित्या द्ध न च केवला ८

म नस्य इति मानस्य' स्वप्न त्तयोऽ यस्य साक्षिणो दृश्य ते

दृश्यत्वेन विपरिवर्त त इत्यर्थः तद्वज्ज प्रवृत्तय इति शेष सर्वदृ
श्रीनां कूटस्थदृष्टिभास्यत्वे सिद्धे फलितमाह द्रष्टुरिति ८

कूटस्था चेदात्मदृष्टिरिष्टा कथ तत्रा यथा प्रथेत्य शङ्क्य वृत्तिम
द त करणाविवेक देवेत्याह

अनित्या ऽवि द्धेति गृ तेऽत्र विवेकत
सु ी दु ी तथा चाह दृश्ययोपाधिभूतया ९

अनित्येति अविशुद्धेति छेदः उपाधिभूतया दृश्यया दृष्ट्या सहाविवेकतो विवेकाग्रहादत्र व्यवहारभूमौ सा नित्या शुद्ध चात्म दृष्टिरनित्याऽविशुद्धेति च गृह्यत इति योजना तथाहं सुखी दुःखीति च म यत इत्युत्तरश्लोकगतेना वयः ९

अविवेकनिब धना मिथ्याभिमानादेव संसारप्राप्तिरित्युक्तमेव स्फुटयति

मूढया मूढ इत्येव शुद्धया शुद्ध इत्य पि
म यते सर्वलोकोय येन ससारमृ छति १

मूढयेति स्पष्टम् १०

कथं तर्हि संसारनिवृत्तिरित्यपेक्षायां तदुपाय ब्रुव मुमुक्षुं शिक्षयति

अचक्षु कादिशास्त्रोक्त सबा भ्य तर त्वजम्
नित्य क्तमिह त्म न मुमुक्षुश्चेत्सदा स्मरेत् ११

अचक्षु कादीति इह प्राणिनां मध्ये कश्चि मुमुक्षुश्चेत्स्य त्स तर्हि स्वात्मानमुक्तरूपं सदा स्मरेत् श्रुत्याचार्योपदिष्टमनवरतमनुसन्धीतेति योजना ११

यदात्मनश्चक्षुरादिराहित्यं प्र क्रसिद्धवदुक्तं तत्र प्रमाणमाह

अचक्षुष्कादिश स्त्र च नेन्द्रिय णि दा मम
अ णो मना इति चाथव वेच १२

अचक्षु दे ति अचक्षु कमश्रोत्रमव गमन इत्या दिना बृहदार यके यथात्मरूपमुक्तं तथा मु डकेऽप्युक्तमित्याह अप्राण इति १२

आत्मनो निर्विशेषत्वे श्रुत्यन्तरमुदाहरति

श द दीन मभावश्च श्रूयते मम ठके
अप्र ो मन यस्मादविक री दा हम् १३

श दादीनामिति अश दमस्पर्शमरूपम ययं तथाऽरसं नित्यमग धवच्च यत् अन द्यन त महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते इति काठके श्रूयत इत्यर्थः उक्तं प्रमाणमनूद्य फलितमाह अप्राण इति एतदचक्षुष्कादेरप्युपलक्षणम् १३

अविकारित्वनिश्चयफलमाह

विक्षेपो नास्ति तस्मा मे न समाधि ो मम
विक्षेपो वा सम धिर्वा मनस स्याद्विकारि १४

विक्षेप इति तस्मात् अविकारित्वादित्यर्थः ततो विक्षेपा भाव दित्यर्थः विक्षेपनिवृत्तिरूपत्वात्समाधेस्तदभावे तदभावः कस्य त र्हि समाधिविक्षेपावित्यपेक्षायां विकारवत एवेति वदन् अविकारिण स्तदभावं द्र्ढयति विक्षेपो वेति १४

मनोवद्विकारित्वाद्व विकारिमनस्तादात्म्य द्वा विक्षेपसमाधी आ त्मनि संभ व्येत म् तदुभयाभ वात्तौ न स्त इत्याह

अ　स　　थ　म
अ　स्त ाविक रि िविदेह य ि नो　　१५

अ नस ेरि　शुद्धस्य　अविकारिण इत्यर्थः　कथममन स्कत्व मविकारित्व चेत्यत आह　अमनस्त्वाविकारित्वे इति　विदेह श्चासौ व्यापी चेति विदेहव्यापी तस्येति विग्रह　विदेहत्वादमनस्कत्व व्य पित्वादविकारित्वं चेत्यथः　१५

कथं तर्हि जिज्ञासावस्थायं सम ध्यादिकं कर्तव्यमिति ते बुद्धि रासीदिति तत्राह

इत्येतद्य वद न त ार्य म भ त्
नित्य स्य शुद्धस्य द्ध च सद मम　१६

इत्ये दि　सदा नित्यमुक्तबुद्धस्य पि मम यावत्पर्य मेत न्नित्यशुद्धत्वादिविषयमज्ञानमासीत्तावत् मम कार्यं समाधानादि कर्त यमभवत्　नेदानीं तज्ज नत कृत्यमस्तीत्यर्थ　१६

इदानीं कस्मात्समाधानादि न कर्त यमित्यपेक्षायां तद्धेत्वभावा दित्याह -

ाधि ाऽ धि ाि कार्यं च तो भवेत्
हि ध्या च द्धु च य त ताम् १७

सम धिर्वे ति　कुतो भवे ममेति शेष　कुतो न भवेदित्यत्र हेतुमाह मां हीति　यस्मान्मां प्रत्यगेकरसं ब्र　ध्यात्वा विचर्य बुद्ध्वा साक्षात्कृत्य कृतकृत्यतां म य ते मुमुक्षव इति शेषः तथाच श्रुतिः　एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीय' निति　यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानव　आत्मन्येव च

सतुष्टस्तस्य काय न विद्यते इति स्मृतेश्च तस्मादज्ञानाभावान्ना स्तीदानीं किमपि कर्त यमित्यर्थः १

ननु यद्यपि यथोक्तात्मविद. सम यादि कर्त यं नास्ति तथा प्यात्मनो ब्रह्मत्व सपाद्य प्रपञ्चस्य विलयः कर्तव्योऽवशि यत इत्या शङ्कच ब्रह्मरूपत्वस्य नित्यसिद्धत्व त्प्रपञ्चस्य चा ज्ञानमात्रविलसितस्य तन्निवृत्तिसमय एव चाधिष्ठानात्मना विलीनत्वान्न तदनुष्ठेयमवशिष्यत इत्यभिप्रेत्याह

अह ब्र स्मि सर्वोऽस्मि शुद्धो बुद्धोऽस यत सदा
अज सर्वत ए ाह जरश्चाक्षयोऽमृत १८

अह ीति सदेति ब्रह्मास्मीत्य दिषु सर्वेषु विशेषणेषु योज्यम् अतस्ततो ब धहीनः सर्वत इति च पदमजोऽक्षय इत्युभयत्र योज्यम् ज मक्षयहेतुरहित इत्यर्थः १८

ननु प्रतिदेहं चेतनभेदे भासमाने कथं ब्रह्मास्मीति प्रतीचः पूर्ण तानुभव इत्यत आह

मद य सर्वभूतेषु बोद्धा कश्चिन्न विद्यते
कर्मा यक्षश्च साक्षी च चेता नित्योऽगुणोऽद्वय १९

मद य इति उक्तेऽर्थ प्रमाणमाह कर्माध्यक्ष इति एको देवः सर्वभूतेषु गूढ. सर्वव्यापी सर्वभूत तरात्मा कर्माध्यक्षः सर्वभूता धिवास. साक्षी चेता केवलो निर्गुणश्चे ति श्रुतावेकस्यैव सर्वभूता त रात्मत्वोपपादन द्धेदप्रतिभानस्याकाशभेदभानवदुपाधिनिब धनत्वान्ना त्म तराशङ्केति युक्तं पूर्णब्रह्मात्मानुभवनमित्यर्थः १९

अहं ब्रह्मासीत्यत्रोक्तमात्मनो ब्रह्मत्वमुपपादितं सर्वोऽस्मीत्युक्त तु बाधायां सामानाधिकरण्याभिप्रायमित्युपप दयति

न ह चा नोभ ` शि
न मे ध्य नर क्ति ं नाह ं `द दृशे २

न मिति सत्प्रत्यक्षयो यं पृथिव्यप्तेजोरूप भूतत्रयम् असत्प्रत्यक्षायोग्यं त्यच्छ दनिर्दिष्ट वाय्वाकाशात्मकं भूतद्वयम् उभय पञ्चभूतपरिणामात्मक शरीरसंस्थानं तत्सर्वं नाहमित्युक्ते नेतिनेतीति म येवारो य निषिद्धत्वा मद य मयि चासत्त्वादहमेवेद् सर्वमिति युक्तमेवोक्तमित्यर्थः केवलः सर्वविशेषशून्य शिवो नि ैगु य' सध्यादिकालविशे योगात्कथ केवलत्वमित्यत अ ह न मे संध्येति तत्र हेतुः सर्वदा दृशेरिति अलुप्तप्रकाशात्मत्व दित्यर्थः यद्वा संध्य दिश दै क्रमेण प्रसुषुप्तिजागरणा युच्यते सदैवैकरूपेणप्रकाशमानस्य स्वरूपावरणविक्षेपरूप वस्थाः कुतस्त्या इत्यर्थ' २

तस्य चिदेकतानस्यात्मनो निर्विषयस्य युक्त ब्रह्मरूपेण पूर्णत्वमिति सन्' तमह

मूर्तिवि था सूक्ष्मद्वम्
` स्मि विनभूत ै ह त द्वम् २१

वंमूर्तीति यथाकाशं सर्वस्मात्परिच्छिन्नाकारादिलक्षणमिति सूक्ष्ममालक्ष्यते तथेदं ब्रह्म परिपूर्णमत्य तसूक्ष्म द्वैताभ वोपलक्षितमि यते तस्माद्ब्रह्मणोऽद्वितीयत्व द त्मनश्च तदन यत्वाद्ब्रह्मैवासीत्यर्थ हिं ब्रह्माक शयोरुपमानोपमेयभावेन भेदात्कथ ब्र ाद्वितायमित्यत आह तेनापीति तेनाकाशेनापि विनाभूतं सिद्ध ास्मि व्यवहारदृष्ट्योपमानादिभेदेऽपि परमार्थतस्तदभावान्नाद्वैतक्षतिरित्यर्थः ए मद्वयपदमाकाशेन स ध्यते द्वितायं ब्र णे पौन त्त म् २१

पूर्वम काशदृष्टा तेन पूर्णत्वनिरूपणात्परम र्थतः परिच्छेदाशङ्का निराकृता इदानीं तेनैव दृष्टान्तेन भेदपरिच्छेदप्रतीतेर्गतिमाह

मा८ आत ति भेदो यो ो यथा भवेत्
एकस्य सुषिभेदन था विकल्पित २२

म त्मे ममज्ञ तुर त्मा स्वरूप ब्रह्मेति स्वतः स्वस्यात्मेति च योऽयमात्मात्मीयभ वेन भेदप्रतिभासः स एकस्य ममा तःकरणा द्युपाधिकृतभेदपरिच्छेदापेक्षया विकल्पित आरोपितो भवेत् यद्वदेकस्य व्यो : सुषिभेदेन छिद्रभेदेनांश शिभावरूपो भेदो विकल्पितो भवति तद्वदित्यर्थ २२

तस्मादविद्यादशायां भेद यवहारेऽपीद नीमवगत त्मतत्त्वस्य सोऽपि ना ीति सिद्धमित्य ह

भेदोऽभेद थ चै ो न न चेति विकलि त
ज्ञेय ज्ञ ता गतिर्ग । येकस्मि कु ो भ त् २३

भेदोऽभेद ति मय्येवैकस्मि पूर्व भेदोऽभेदश्च विकल्पितो व्यवहृत तथा एको नाना चेति च हमेव विकल्पितः ज्ञेयं ज्ञात गति फलं ग ता फलप्र सिकर्ता भोक्तेति चाहं विकल्पित इति योजना एतत्सव कुतो भवेत् विचार्यमाणे न भवेदेवेत्यर्थः २३

ननु तथापि ससारित्वं हेयं ब्र त्वं चोपादेयमिति न निर्विशेप त्वम त्मन इतिचेत्तत्राह

न मे हेय चादेय वि री तो हम्
द था दा द्धोऽगु ोऽद्वय २४

न मे हेयमिति तत्र हेतुम ह अविक रीति यतो यस्मा

दहमविक री कुतोऽविकारीत्यपेक्षायां तत्र प्रम णं हिशब्देन सूच्यते अविकार्योऽयमुच्यत इति स्मृतेरित्यर्थः फलितमाह -सदा मुक्त इति सदैव ब धसंसर्गशून्य इत्यर्थः तथा शुद्धस्तद्धेत्वविद्यासंब धरहितः यतः सदा बुद्ध तर्हि किं बोधगुणः ेत्याह अगुण बोधरूप एवेत्यर्थः तर्हि बोध्य किंचिद् यदस्ति नेत्याह अद्वय इति २४

तदेवमुक्तलक्षणेनात्मतत्त्वं शास्त्राचार्यप्रसादाच्छ्रवणमनननिदि ध्यासननिष्ठ प्राप्तः सन् सदा मुमुक्षुरहं ब्र ास्मीत्यनुसंद"यादिति मुमुक्षुं प्रोत्साहयति

इ(व वेद त्मान वि ात्सर्वं सम हि
विदित्वा मा देह मृषि क्तो ध्रुवो भवेत् २५

इत्येव मिति सर्वं पूर्वमुक्तं वेदनफलमाह विदित्वेति ऋषिः सर्वदर्शी २५

उक्ततत्त्वविद् उक्तां मुक्तिं प्रपञ्चयति

त (श्च सिद्धश्च योगी ण एव च
य एव द .त्त्वार्थम य ा ात्मह भवेत् २८

कृतकृत्य रि स ब्राह्मण इति श्रुतेर्मुख्यो ब्रा ण एव च भ दिति सब धः एवं निष्ठाहीनस्य प्रत्यवायमाह अ यथेति उक्तं श्रीभागवते भगवता नृदेहमाद्य सुलभं सुदुर्लभ प्लवं सुकल्पं गुरुक धारम् मयानुकूलेन नभस्वतेरितं पुमा भवा ध न तरेत्स आत्महे ति २६

उक्तस्य प्रकरणार्थस्य प्रामाणिकत्व दर्शय प्रतिपत्तिसौकर्यमाह

वेदार्थो निश्चितो ेष समासेन मयोदित
स यासिभ्य वक्त य शा तेभ्य शि बुद्धिना २७

वेदार्थ इति अस्य ग्रहणे मुख्याधिकारिणो दर्शयति सं या सिभ्य इति न केवलं प्राप्तसं यासाश्रममात्रेभ्य· किंतु शा तेभ्य· शम दिसाधनसंपन्नेभ्य इत्यर्थ· उपदे ार विशिनष्टि शिष्टबुद्धिने ति शास्त्राचार्यानुशिष्टबुद्धिनेत्यर्थः २

इति त्रयोदश चक्षुष्ट्वप्रकरणम् १३

स्व स्मृति र म् १४

पूर्वस्मि प्रकरणेऽ त·करणाविवेकादात्मनि ससारित्वप्रतीतिर्न स्वत इति श स्त्रप्रामा याद्ब धिताज्ञानतत्कार्यो ब्रह्मरूप एवात्मेति निर्धारि तम् इदानीम तःकरणस्य परोक्षत्वात्संसारप्रतिभासस्य चापरोक्षत्वान्न तत्प्रतिभ सो बुद्ध्यविवेककृत इत्याशङ्क्या तःकरणस्यापरोक्षत्वप्रतिपा दनपूर्वकं पूर्वे क्तशास्त्र थे युक्तिप्रदर्शनपरं प्रकरण प्रक्रमते

स्व स्मृत्योघट देर्हि रूप भास दृश्यते
पुरा नून तद कारा धीर्द ्त्य मीयते १

स्नस्मृत्योरिरि हि यस्मात्स्वप्ने स्मृतै च घटादेर्विषयजातस्य रूपाभास आक रावभासो द्दश्यतेऽनुभूयते तस्मात्पुरा पूर्व ज ग्रद्व स्थायामनुभव वस्थायामपि नूनमवश्यं तदाकारा घटाद्याक रा धीर तः कर ावृत्तिर्दृष्टा साक्ष दनुभूतेत्यनुमीयत इत्यर्थः स्वप्नस्मृत्योर्दृष्टार्थ विषयत्वनियम त्पूर्वदृष्टस्य बाह्यार्थस्य तत्राभावात्स्वप्नस्मृत्योरुपलभ्यम नो विषयोऽर्थ कारवृत्तिमद तःकरणमेवेति जाग्रत्पूर्वानुभवयोरप्य तःकर

णमेवार्थाकारवृत्तिमदपरोक्षमनुभूतमिति कल्प्यते तस्मात्सर्वास्व यव स्थासुवृत्तिमद तःकरणस्य परोक्षत्व त्तद्गतचिदाभासाविवेकादात्मन. संसारित्वात्रभासोऽपरोक्षो युक्त इति भावः १

एवम तःकरणस्यापरोक्षत्वे निरूपिते किमाय तमात्मन इत्यपेक्षायां ञ्यद तःकरणादिसंघाताद्विवेकसिद्धिराय तेति सन्ष्टा तमाह

भिक्षाम था ` ग्ो देहो स्वयम्
जा दृश्या ा देह द्र्८ द ए स २

भिक्षार्ा ति सुषुप्तस्य यतेः स्वप्ने भिक्षामट ञ्ष्टो यो देह' स्वयं द्रष्टा न भवति यथ तद्देहात्मत्वमभिम यमानोऽपि तदात्मको न भवति तथ ज ग्रदृश्यादपि देहात्स आत्म य एव द्रष्टृत्व दित्यर्थः देहपदमुपलक्षणमिन्द्रिया तःकरणयोरपि तथाच प्रयोग विमतो देहादिर्नात्मा दृश्यत्व त्स्वप्नदृश्यदेहादिवदिति २

बुद्धिरेव सर्वावस्थास्वर्थकारा दृश्यत इत्युक्तमर्थं ञ ा तेन पष्टयति

मूषासि क्त य ा त म्र ि भ ज यते तथ
रूपादी या ुवि त्त तद्भि भ दृश्यते ध्रुवम् ३

मूषेति मूषान्तःसुषिरा मृत्प्रतिमा यथाग्निसंपर्कद्रवीभूतं त म्र मूषायां निषिक्त निक्षिप्तं सत्तन्निभ जायते तत्समानाकृति भवति तथा चित्तमपि रूपादीन्विषया व्य प्नुवत्तन्निभं ञ्श्यते तदाकारं जायत इत्यर्थः ३

ननु मूष सिक्तताम्रस्य कठिनमूषाभिघातेन शैत्यापत्तौ तदाकार प त्तिरिति युज्यते चित्तस्य त्वमूतत्वाद्विषय याप्तावपि कथं तदाकार पत्ति संभव इत्याशङ्क्य ञ्ष्टा तान्तरमाह

यञ्जको वा यथ लो गो यञ्च्य ाकारतामियात्
सर्वार्थं यञ्जकत्वाद्धीरर्थाक र ं प्रदृश्यते ४

यञ्ज को वेति व्यञ्जकोऽ यादिरयःपि डादेरालोको वा घटादेः स्पष्ट र्थः

बुद्धेर वयमुखेन स्वप्नस्मृत्योरित्यत्रोपपादितमपरोक्षत्वमनूद्य व्यतिरेकमुखेनोपपादयति

धीरे ाथ् रूप हि स दृ ा पुर पि च
न चेत् ` कथ श्येत् रतो ा ति कुत ५

धीरेवेति स्प म् ५

आलोक दिवद्यञ्जकत्वाद्धुद्धेर्व्यञ्ज्याक रत्वमुक्तं स्पष्टयति

त् देवा ा रूप क रदृश ता
द्रष्टृत्व च दृशेस्तद्ध सि ाद्धिय उद्भवे ६

यञ्जकत्व मे ति अस्या बुद्धेर्या रूपाद्याकारेण दृश्यता दर्शनयो यतापत्तिस्तदेव विषयव्यञ्जकत्वमित्यर्थः चैत यं हि विषयावभासो विषयश्च न बुद्धेर यत्र स्वात ्येण स्फुरति तथाच बुद्धेर्वैषयाकारत्व भ वे चैत यस्य विषयात्मना स्फू र्तिरनुपपन्नेति विषयाभिव्यक्त्यर्थतया तदाकारापत्तिरेव बुद्धे र्यञ्जकत्वमित्यभिप्रायः यथा रूप द्याकारेणावभासमानत्वमेव धियो रूपादि यञ्जकत्वं तथा दृशेरात्मनो धिय उद्भवे धर्माधर्मवशादुत्पत्तौ सत्यां तद्व्याप्तिस्तदात्मना स्फुरणमेव द्रष्टृत्वं न परिण म इत्य ह द्रष्टृत्वं चेति यद्यपि धियो विषय ्य सि परिण ममन्तरेण न भवति विषयदेशे तस्याः प्र गेव सत्त्वात् तथापि चैत य त्मनो धीवृत्तिव्याप्तौ न परिणामापेक्षा

चिदात्मन्येव तत्प्रकाशकवलिताया एव धियः सदोत्पत्तेरिति भावः ६

बुद्धितद्वृत्तिसाक्षित्वेन चिदात्मनः परिणामाभावेऽपि न तस्य ब्रह्मरूपतयैकत्वं युक्तं प्रतिदेहं तत्तद्बुद्धिसाक्षिभेदादित्याशङ्क्य प्रमाणाभावान्नैवमित्याह

चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः।
मया यस्मात्प्रकाश्यन्ते सर्वस्यात्मा ततो ह्यहम्॥ ७॥

चिन्मात्रेति यथैकस्मिञ्छरीरे बुद्ध्यवभासो विकृतचिद्व्याप्तिमात्रस्तथा सर्वशरीरगतबुद्ध्यवभास इति भास्यबुद्धिभेदेऽपि न तदवभासस्वरूपभेदः प्रमाणपथमवतरति भेदस्यापि साक्ष्यत्वेन साक्षिधर्मत्वाभावान्न साक्षिभेदशङ्कावकाश इत्यर्थः

चैतन्यस्य सर्वत्रैकत्वेऽपि दृश्यस्य बुद्ध्यादेरनेकत्वान्नाद्वयब्रह्मात्मतासिद्धिरित्याशङ्क्य सकलदृश्यस्यानाद्यनिर्वाच्यविद्याविलसबुद्धिमात्रत्वेन तस्याद्वयब्रह्मत्वमविरुद्धमित्युपपादयति

करणं कर्म कर्ता च क्रिया स्वप्ने फलं च धीः।
जाग्रत्येवं यतो दृष्टा तस्माद्द्रष्टाऽद्वयः॥ ८॥

करणमिति यथा क्रियाकारकफलानि स्वप्ने धीरेव बाह्यार्थस्य तदा तत्राभावादिति निश्चितं एवमेव जाग्रति जाग्रदवस्थायां च यतो धीरेव क्रियाकारकफलरूपा दृष्टा तयैव बहिः पदार्थसत्त्वमवगतम् तथासति सुषुप्तावपि तदाकारविशेषस्फुरणं कदाचित्स्यात् तस्माद्विषयैः सहैवात्मनि बुद्धेरध्यस्तत्वात्तस्याश्चाद्यतयत्त्वेन मिथ्यात्वाद्द्रष्टात्मा ततो बुद्धेरन्यथ यादृशः सत्योऽखण्डैकरस इत्यर्थः ८

अ यथेत्युक्तं स्फुटयति

बुद्ध्यादीन मनात्मत्व हेयोप देयरूपत
हानो ादानकर्त त्मा न त्य ज्यो न च गृ ते ,

बुद्ध्य दीनामिति बुद्ध्यादयो नात्मस्वरूपधर्मा आगमाप यि त्वाद्वस्त्रादिवदित्युक्ते चिदात्मनि यभिचारमाशङ्कच परिहरति हा नोपाद नेति बुद्ध्यादेर्हानोप दानयोर्लयविक्षेपयो. कर्तात्मा तदधि ष्ठानमात्रेण कर्तेत्युच्यते स न केनचित्त्याज्यो न विलाप्यो नच गृह्यते न विक्षिप्यते आत्मनः सर्वाधि ानत्वात्तस्य चाधिष्ठाना तराभावा दित्यर्थ ९

अ त्मनः स्वरूपेणाहेय नुपादेयत्वेऽपि तत्संबन्धित्वेन प्राप्तस्य बा स्य वस्त्र भरण देरा तरस्य च पापादेर्हेयत मा तरस्य च योगध्या नादेरुपादेयत्व भविष्यतीति न विशु द्धिरात्मन इत्याशङ्कचाह

ाभ्य रे द्धे प्रज्ञ नैकरसे घने
माभ्य र चा यत थ हेय ्य १

सबा ति बा ाभ्य तरसहिते बा माभ्य तरं चात्मैव न ततः पृथगित्यर्थः यत. शुद्धः केवलोऽतो बाह्याभ व यतश्च प्रज्ञानैकर सोऽतो ना तरमपि पृथगस्ति एकरसत्वं स्पष्टयति घन इति सै धवघनवद्विज्ञानघन इत्यर्थः हेयमित्युपलक्षणम् एवंभूते अ त्मनि कथं हेयमुपादेय वा कल्प्यत इत्यर्थ· सत्तास्फूर्त्यैनालिङ्गितस्य बाह्यस्याभ्य तरस्य चोल्लिखितुमशक्यत्वात् तयोश्चात्मस्वरूपत्वान्न ततो बहिर तर्वा किमप्यस्ति परमार्थतो यदुप देयं हेयं वा भवेदिति नात्मनो विशुद्धिसकोचावकाश इति भावः ०

वस्तुस्वभावानुसारेण विच र्यम णे नात्मनि हेय द्यस्तीत्युक्तम् इदानीं विद्वदनुभवेनाप्ययमर्थेऽवग यत इत्य ह

य आत्मा नेतिनेतीति परपाठेन शेषित
स चेद्ब्रह्मविदात्मेष्टो यतेत तत्र कथम् ॥ ११ ॥

य आत्मेति ब्रह्मविदो ज्ञानिनः आत्मा स्वरूपम्, कथं यतेत तत्कृत्यत्वादित्यर्थः ॥ ११ ॥

एवंविधमात्मतत्त्वं न परानुभवगम्यमिति स्वयमेवात्मविदा शास्त्राचार्योपदेशानुसारेण विवेक्तव्यमित्याह

अशनायाद्यतीतं यत्तद्ब्रह्मैवास्मि निरन्तरम्
कार्यवान्स्यां कथं चाहं विमृशेदेवमञ्जसा ॥ १२ ॥

अशनायादीति षडूर्मिरहितमित्यर्थः ॥ १२ ॥

एवं विमर्शे प्रत्यक्षं प्रापणीयमितिकर्तव्यबुद्धिरेव न भवेदिति दृष्टान्तेनाह

पारगस्तु यथा नद्यास्तत्स्थः पारं यियासति
आत्मज्ञश्चेत्तथा कार्यं कर्तुमन्यदिहेच्छति ॥ १३ ॥

पारग इति नद्याः पारं परतीरं गतो यथा तत्स्थः परतीरस्थ एव तमेव पारं यियासति यातुं प्राप्तुमिच्छति चेदित्यन्वयः, तथा यथोक्तात्मनोऽन्यत्कार्यं कर्तुमिह श्रेयोमार्गे इच्छतीति योजना, नैव यियासति नैवेच्छति चेत्यर्थः ॥ १३ ॥

यः पुनरात्मज्ञोऽपि कार्यवान्स्यात्स न स यथार्थदर्शीति तं निन्दति

आत्मज्ञस्यापि यस्य स्याद्धानोपादानता यदि
न मोक्षार्हः स विज्ञेयो वान्तोऽसौ ब्रह्मणा ध्रुवम् ॥ १४ ॥

आत्मज्ञस्यापीति स्पष्टार्थः ॥ १४ ॥

अनागतां तु ये पूर्वामनक्षत्रां तु पश्चिमाम् । संध्यां नोपासते

विप्रास्ते कथं ब्राह्मणा स्मृता इति स्मृतेब्र विदोऽपि विप्रस्य संध्याव दनमस्ति कार्यमित्याशङ्क्य कैमुतिक यायेन निराकरोति

दित्य हि जग ा ह र्नै व
प्र पि स्य ा ो विदोऽद्वये १५

दित्य मि आदित्य सूर्यस्तत्सहितमिदं जगत्सर्वं हि यस्म त्प्राणो हिर यगर्भस्तस्मात् प्र णज्ञस्यापि प्राणोऽहमस्मी ति प्र णा त्मभावमापन्नस्याप्युपासकस्येति यावत् अहर्निशैव वा न स्याताम् उदयास्तमयरहितसूर्यरूपत्वात्तस्याहोरात्रे न स्यात मित्यर्थ तथाच श्रुति न ह वा असा उदेति न नि लोचति सकृद्दिवा हैवास्मै भव ती ति तथाच प्र णज्ञस्यापि प्राणविदोऽपि भेददर्शिनो यद्यहर्निशे न स्यातां तदास्य ब्र विदो मुख्यब्र भूतस्याद्वये सर्वद्वैत भासरहिते स्वरूपे सति ते कुतः स्य तां न कुतोपीति क लभेददर्शनाभ व देवा तन्निमित्तकर्त याभाव इत्यर्थः १५

ब्रह्मविदो बाह्यक्रियाभावेऽपि संध्यं समाधावात्म याचरे दिति श्रुतेः स्वात्मनि विस्मृतिं परित्यज्य मोक्षाय स्मृतिः कर्त येत्यत आह

न रत्य त्मनो ह्यात्मा विस्मरेद्व लुप्तचित्
मनोऽपि र तीत्येत ज्ञ नमज्ञानहे जम् १६

न रतीति स्मरतियोगात्षष्ठी द्वितीयार्थे स्मरणविस्मरण योरभावे हेतुः अलुप्तचिदिति यद्यशक्यत्वादात्मन स्मरण विध तुं न युक्तं त हि तत्त्वज्ञानादूर्ध्वमाविर्भावतिरोभावादिविकार शा तये मन एव त्म नं स्मरेदिति विधिः स्यादित्यत आह मनो ऽपीति मनसोऽचेतनत्व त्स्मर्तृत्वानुपपत्तेर्मन स्मरतीति ज्ञानमप्यज्ञा

नहेतुजमविवेकविलसितमित्यर्थ   तथाचास य ब्र विद आत्म यति रेकेण मनः पश्यत संध्यं सम धाविति विधिर्न सम्यग्ब्र विद इति भावः   ६

यद्यप्यात्माऽलुप्तचिद्रूपत्वान्नात्मानं स्मरति तथापि परमात्मान स्मरेदेवेत्याशङ्क्याह

तुर्ज्ञेय परो ८ ा सोऽविद्य कल्पित स्मृत
अपो वि ा स्मिन्न व पे इव द्वय   १७

ज्ञ तुरि   यदि पर अ त्मा ज्ञातुर्ज्ञेयो विषय स्यात्तदा सोऽविद्य कल्पितः स्वाज्ञानकल्पितो हि निश्चितं स्मृतो ज्ञातो विद्वद्भिः ज्ञ नविषयस्य रज्जुसर्पवदविद्याकल्पितत्वनियमात्स आत्मैव न भवता त्यर्थः तथाच तस्मिन्नात्मनः परत्वज्ञेयत्वादिके विद्य ा आत्मविद्य याऽपोढे बाधिते सति ज्ञातृज्ञेयविभाग भावादद्वय एवात्मा भवती त्यर्थः तत्र दृष्ट तो रज्ज्वां सर्प इवेति यथा रज्जुविद्यय सर्पे ब धिते रज्जुरेवावशि यते तद्वदित्यर्थः   १७

प्रत्यगात्मनो वस्तुतोऽद्वितीयत्वेऽपि तस्मि ममाहमित्यादिसंसार प्रतिभासात्तन्निवृत्तये किमपि कर्त यं भविष्यतीत्यत आह

कतृकर्मफलाभ वा८ ब   भ्य र जम्
मम ह वेत्ति यो भ   रि कस्य कु ो भवेत् १८

तृकर्मे ति   कर्तृकर्मफलभेदाभावात्सबाह्याभ्य तरमजमेव त्म स्वरूपं हि यतः तस्मिन्नात्मनि ममाहमित्य दिरूपो यो भावः प्रति भ सः स कस्य भवेत्कुतो वा हेतोर्भवेत्   न भवेदेवेति योजना तस्म त्तज्ज्ञानोत्पत्तेः प्रागेव सर्वकर्तव्यता नोर्ध्वमिति भ व. । १८

अ त्मविदो देहादावहंकारममक राभावे हेतुमाह

आत्मा त्मीय इत्येष भावोऽविद्याप्रकल्पित
आत्मैकत्वे ह्यसौ न स्ति बीजाभा े कुत फलम् १९

आत्मा ह्यात्मीय इति आत्मैकत्वे ज्ञाते सतीति शेषः १९

केन प्रमाणेन तदात्मकत्वं ज्ञातुं शक्यमित्यपेक्ष यां वेदा तव क्य प्रमाणबलादित्याह

द्रष्टृ श्रोतृ तथा म तृ विज्ञ त्रेव तदक्षरम्
द्रष्ट्राद्य यन्न तद्यस्म त्तस्माद्द् ाहमक्षरम् २

द्रष्टृश्रोत्रिति द्वा भ्याम् यद्द्रष्टृ श्रोतृ मन्तृ विज्ञातृ प्रसिद्धं प्रत्यग्रूपं तदक्षरमेव सर्व धिष्ठानं ब्रह्मैवेति योजना तथाच श्रुतिरक्षरं प्रकृत्य अन्ष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञात्रि ति तथा ना यदतोऽस्ति द्रष्टृ ना यदतोऽस्ति श्रोतृ न यदतोऽस्ति विज्ञात्रि त्युत्तरवाक्यार्थमाह- द्रष्ट्रादीति तत् द्रष्ट्रादिप्रत्यक्स्वरूपं तस्माद् क्षराद यन्न भवतीत्यर्थः यस्मादेवमविषयभूतमेवाद्वयमात्मतत्त्वं श्रुतिसिद्धं तस्म द्रष्टाहमक्षरमित्युपसंहारः २

प्रत्यगात्मनोऽक्षरब्रह्मात्मत्वेऽपि कथमद्वयात्मत्वसिद्धिरित्याशङ्क्य एतस्मिन्नु खल्वक्षरे गा र्याकाश ओतश्च प्रोतश्चे ति श्रुत्यर्थं वदन्न द्वयात्मत्वं साधयति

ावर जगम चैव द्रष्टृत्वादिक्रिय युतम्
सर्वमक्षरमेवात सर्वस्यात्माक्षर त्वहम् २१

स्थावरमिति उपाधिरुपहितमुपाध्य धारश्चेति सर्वमक्षरमेवा तोऽहमक्षर सर्वस्यात्मा स्वरूपं न मद यत्किमप्यस्तीत्यर्थः २१

स्थावरादिसर्वमक्षरमित्युक्ते सप्रपञ्चमेवाक्षरमात्मेति प्रतिभासशङ्क वारयन्नागमिकमात्मज्ञान स्फुटयति

अक र्यशे म त्म नमक्रि य त्म क्रि फलम्
निर्मम निरहक र य पश्यति स ३ ति   २२

अकार्यशेषमिति अकार्यशेषत्वमकर्तृत्वम् तत्र हेतुः अक्रिया त्मेति क्रियास्वरूपतत्फलविलक्षणमित्यर्थः क्रियातत्फलसंसर्गशू यमिति वा कुतः यतो निर्ममम् तदपि कुतः यतो निरहंकारम् एवंविधमात्मानं यः स यक्पश्यति स एव तत्त्वदर्शीत्यर्थः २२

अ त्मविदोऽहकाराद्यभाव दकर्मशेषत्वमुक्तं प्रपञ्चयंस्तस्य कृत कृत्यतामाह

ममाहकारयत्नेच्छ शू य एव स्वभ वत
आत्मनीति यदि ज्ञातमा व स्वस्था किमीहितै २३

ममाहक रेति आत्मनि स्वभावतः शून्या एवाविद्याप्रयुक्तदेहाद्यभिमानं विना न स तीत्यर्थः हे मुमुक्षव. यद्येवं ज्ञात तर्हि स्वस्था नि र्यग्राः स तः आध्व ति त किमीहितैः कर्मभिः कृत्यं. ज्ञानेनैव कृतकृत्यत्वात्कर्मणां चानधिकृतकृतानां विफलत्वाच्चे त्यर्थः २३

देहाद्यतिरिक्तात्मज्ञानवतः सर्वेषु पारलौकिककर्मस्वधिकाराभ्युपगमादस्यात्मविदोऽपि सफलं कर्मेत्याशङ्क्य तस्यात्मतत्त्वविरवमेव नास्तीत्य ह

योऽहकर्तारमात्मान तथ वेत्त रमेव च
वेत्ति न त्मज्ञ एवासौ योऽ यथ ज्ञ स आत्मवित् २४

योऽ कर्तारमिति कस्तर्ह्यात्मविदित्यत आह योऽ यथाज्ञ इति योऽकर्तारमज्ञातारमभोक्त रं च त्मान जानाति स आत्मतत्त्व विदित्यर्थः २

किमिति कर्तात्मेति जानतो नात्मवित्त्वमात्म येव कर्तृत्वादिप्रति भासादित्याशङ्क्य कर्त्रविवेकनिबन्धनोऽयं भ्रम इत्यभिप्रेत्याह

यथ यत्वेऽपि तादात य देह दि वात्मनो मतम्
तथाकर्तुर विज्ञानात्फलकर्मात्मतात्मन २५

यथा यत्वेऽपीति यथा परमार्थतो देहादिभ्योऽन्यत्वेऽप्यात्म नस्तेषु तादात्म्यमाध्यासिकं मतमिष्टं तथाऽकर्तुरभोक्तुरविज्ञानादा त्मन' फलकर्म त्मता मता यथा स्थूलदेहात्मनोरभेदाध्यासान्मनुष्य त्वाद्य भिमानस्तथाहंकारप्रधानलिङ्गदेहाविवेकात्कर्तृत्वाद्य भिमानो मि थ्य बुद्धिरित्यर्थः २५

न वहंकारस्यैवात्मत्वात्कथमहंक रात्मनोरविवेक इत्युच्यत इत्यत आह

दृष्टि श्रुतिर्मतिर्ज्ञाति स्व द ा जनै सदा
तासामात्मस्वरूपत्वादत प्रत्यक्षतात्मन २६

दृष्टिरिति दृष्ट्यादिश दैश्चक्षुरादिद्वारका तःकरणवृत्तयो नि र्दि श्य ते तास्तु सदैव स्वप्ने जनैर्दृष्टाः सवृत्तिकस्या तःकरणस्य स्वप्ने वेद्याकारत्व त्तद्वेदिता यः साक्षी सिद्ध इत्यभिप्रायः किंच तासां दृष्ट्या दीनामात्मस्वरूपत्वादिति अयमर्थः सुषुप्ते सवृत्तिकस्या तःकरणस्या विद्यामात्रतय त्म यस्तमयाद त्मनश्चानस्तमय त्वतस्तस्य द्वितीय परोक्ष चि मात्रतयावभासमानत्वाद्युक्ता त करणादहंकार दिरूपादात्मनो व्य तिरेकसिद्धिरिति यत एवमत आत्मनः प्रत्यक्षत साक्षिमात्रेण स्वयं प्रकाशमानतया नित्यापरोक्षब्रह्मरूपता सिद्धेत्यर्थः २६

एवमशेषप्रम तृसाक्षि भूततया प्रत्यगात्मनो ब्रह्मत्वापादने लाभं दर्शयन्योऽ यथा ज्ञः स आत्मविदित्यत्रोक्तमात्मवित्त्वं स्पष्टीकरोति

रलोकभय स्य न स्ति मृत्युभय त
स्या॰ ज्ञ शो या स्यु स ॅद्रा अ ीश्वरा २७

परलोकभय ॅति यस्य परलोकभयं परलोकनिमित्तं भय किमहं साधु नाकरवं किमहं पापमकरव मित्य दिरूप नास्ति नैन कृताकृते तपत इति श्रुतेः तथा यस्य मृत्युभयं मरणभयं नास्ति ´न जावो म्रियत इति श्रुतेः आत्म यतिरिक्तस्य द्वितीयस्यादर्शनात् द्वितीयदर्शननिमित्तं हि भयं द्वितीयाद्वै भय भवती ति श्रुतेः तस्य त्मज्ञस्य ब्रह्मे द्राद्या अपि ज्ञानैश्वर्यसंपन्नतया ईश्वरा अपि शोच्या शोचनीयाः स्युरहो एते ऐश्वर्यासक्ततया यग्रा कथं स्वस्थाः स्युरिति तस्माद्य परलोकमरणनिमित्त यग्रत हेत्वहंकारादिशून्यतया ब्रह्मनिष्ठः स एवात्मविन्न विपरीत इति सिद्धम् २७

ब्रह्मे द्रादिभावस्य सर्वैः प्रार्थ्यमानत्वात्कथं शोच्यतेत्याशङ्क्य ब्रह्मात्मज्ञानादूर्ध्वं न किमपि प्रार्थ्यमस्तीत्याशयेनाह

ईश्वरत्वेन किं तस्य ब्र ॅद्रत्वेन । न
तृ णा चेत्सर्वतश्छि । सर्वदै योद्भवाऽशुभा २८

ईश्वरत्वेनेति सर्वत्र दै यस्योद्भवो यस्याः सा तथा अतएवाशुभा प पप्रवृत्तिद्वारत्वात्सा तृष्णा चेत्सर्वतः सर्वात्मना सहमूलेन छिन्नेत्यर्थः तथाच श्रुतिः यदा सर्वे प्रमुच्य ते काम येऽस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति २८

निर्ममं निरहंकारं यः पश्यति स पश्यती त्युक्तं स्पष्टयन्नात्मज्ञस्य लक्षणमाह

अहमित्यात्मधीर्या च ममेत्यात्मीयधीरपि
अर्थशून्ये यदा यस्य स आत्म ो भ ॅ दा २९

अहमितीति यस्य शास्त्राचार्यानुगृहीतस्य पदार्थद्वयविवेकवतो ऽहंममेति चात्म त्मीयविषयधियावर्थशून्ये प्रयोजनशून्ये यदा स्य ताम् तत्प्रयुक्तव्यवहारहीन. पुमान्यदा स्यादित्यर्थः तदा स आत्मविद्भ वेत् देहादौ तदनुब धे च यवहारक लेऽपि पूर्ववद्वस्तुत्वोल्लेखरहिततया आत्ममात्रदर्शी स यगात्मविदित्यर्थः २९

यदैवमात्मज्ञानं वाक्याद्भवति तद कृतकृत्यत्वान्न तस्य क र्यशेष ता संभवतीति प्रागुक्तमकार्यशेषत्वं प्रपञ्चयति

बुद्ध्य दौ सत्युप धौ च तथासत्यविशेषता
स्य चेदात्मनो ज्ञाता तस्य कार्यं कथ भवेत् ३

बुद्ध्य दा विति जाग्रत्स्वप्नयोर्बुद्ध्यादावुप धौ सति तथा सुषुप्ता वसति च यस्यात्मनोऽविशेषता चेज्ज्ञ त चेच्छ दोऽसंदेहेऽपि संदेहवचनो वेदाश्चेत्प्रमाणमितिवत् तस्याविशेषात्मज्ञस्य कार्यं कथं भवेत् न कथंचिदित्यर्थः ३

आत्मविदो नास्ति कार्यमित्यत्र हेत्व तरमाह

प्रस विमले योम्नि प्रज्ञानैकरसेऽद्वये
उत्पन्नात्मधियो ब्रूत किम यत्कार्यमि यते ३१

प्रसन्न इति योम्नि व्योमसदृशे प्रसन्ने स्वतो दोषरहिते विमले आग तुकमलवर्जिते उक्तविशेषणद्वयसाधकं क्रमेण विशेष णद्वयं प्रज्ञानैकरसेऽद्वय इति एतस्मि ब्रह्म युत्पन्ना आत्मधीर त्मे ति मतिरेवंविधं ब्रह्मैवात्मेति बुद्धिर्यस्य तस्यात्मस्वरूपज्ञान द यत्किं कार्यमिष्यते तद्ब्रूत न किमपीत्यर्थः ३१

.ननु शास्त्राचार्यप्रसाद देवं तत्त्वेऽवग यमानेऽपि श्रेयोमा प्राप्ति

प्रतिबधकस्य शत्रो संभवात्तत्परिहारर्थं किमप्यनु य स्यादिति चेन्नेत्याह

अ त्म न सवभूतस्थममित्र च त्मनोऽपि य
श्यद्नि छ८ सौ नून शीतीकर्तु विभावसुम् ३२

अ त्मानमिति यथो णस्वभावस्य विभावसो शीतस्वभावतापादनं न सभाव्यते तथा सर्वभूत त्मभूतस्य शत्रुमित्र दिसंभावना दुःसंपाद्येति नानुष्ठेयकल्पनावसर इत्यर्थः ३२

आत्मनः कर्मशेषत्व किं सोपाधिकस्ये यते निरुप धिकस्य वेति विकल्प्याद्यमङ्गीकृत्य द्वितीय दूषयति

ज्ञ ा ानुकार्यात्मा छायेव क्षादिगोचर
ध्य यतीवेति चो ो हि शुद्धो क्त स्व ा हि स

प्रज्ञेति प्रज्ञा बुद्धिः प्रज्ञाप्राणावनुकर्तुं शीलमस्तीति प्रज्ञाप्राणानुकारी प्रज्ञाप्राणोपाधिक इत्यर्थ॰ छ येव सूर्यादिप्रतिबिम्बमिव जलेष्वक्षादिगोचरः इन्द्रियतद्वारकवृत्तिषु प्रति बिम्बित अ त्मा तदविवेकात्करोतीवेति ध्यायतीव लेलायतीवे ति श्रुत्योक्तस्तस्यां दशायं कर्मशेषत्वमश्नुवानोऽपि स्वतःशुद्धो मुक्तश्च हि स आत्मा भवति उदकानुगतत्वेन सूर्यस्य कम्पादिमत्तया भ समानत्वेऽपि न परम र्थत॰ सूर्यः कम्पादिमा भवति तथात्रोप धिविगमे भेदविपर्य सादिविगमाद्ध रहीन कर्म त्मतत्त्वविदं न ढौकत इत्यर्थ॰ ३३

निरुप धिकस्यात्मनो न कर्मशेषत्वमित्युक्तमुपपादयन् प्राणायामा षडाचरे दित्यादियतिधर्मविधिशेषतापि नास्यास्तीत्याह

अ ा स्य मनस स्य थाऽससर्गिणो शे
योम ापिनो स्य क्ष ३४

१ ग्रंथ इ ऱ य उच्च ति न्ती

अप्र णस्येति क्रियाशक्तिप्राणहीनस्य ज्ञानशक्तिमनोहीनस्य स्वभावतोऽसंसर्गिणोऽसङ्गस्य व्योमवदपरिच्छिन्नस्य स्वतश्चलनशक्ति रहितस्येतिथ वत् ईदृशेश्चिदेकरसस्यास्यैवंविधस्य मम कथं कार्यं भवेत् नकथमपीत्यर्थ. ३४

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये' इत्यादिभगवद्वचना मनःसमाधानानुष्ठाने नात्मशुद्धिः संपाद्यावशिष्यत इत्याशङ्क्य तस्याः प्रागेव सिद्धत्वा न्नेदानीमस्त्यवसर इत्यभिप्रेत्याह

असमाधिं न पश्यामि निर्विकारस्य सर्वदा
ब्र णो मे विशुद्धस्य शोध्यं न यद्दिप मन ३५

असमाधिमिति विकारो ह्यसमाधिर्नाम तद्धेतूपधिशून्यतया सदा निर्विकारस्य तन्न पश्यामि ब्रह्मभूतस्यातएव सर्वदा विशुद्धस्य प्रागेव विपाप्मनो नित्यनिवृत्तकल्मषस्य शोध्यं चा यन्न पश्यामी त्यर्थः ३५

न व यन्न पश्यामीत्ययुक्तं ग तव्यब्रह्मलोकादेर्मनसाधनस्यार्चिरा दिमार्गस्य च ब्रह्मविदोऽपि ज्ञातव्यत्वादित्याशङ्क्य सगुणब्रह्मविदस्त त्सत्त्वेऽपि न निर्गुणब्रह्मविदस्तथात्वमिति सहेतुकमाह

ग च तथा नैव सर्वगस्याचलस्य च
नोर्ध्वं नाधस्तिरो वापि नि कलस्यागु त्वं त ३६

ग त यमिति ग तव्यमिति भ वकर्मणोस्तन्त्रेण ग्रहणम् तथाच सर्वगत्वेन चलनासामर्थ्याद्ग तव्यं नैव पश्यामि गमनध त्वर्थं नैव पश्यामीत्यथः तथा ग त यं गत्वा प्र प्यं देशं स्थानविशेषं न पश्यामि कुत इत्यत आह नोर्ध्वमिति तिर इति पुरस्तात्पश्चाद्दक्षिण

चोत्तरं च नैव पश्यामीत्यनुषङ्गः कुतो देशभेदाभाव इत्यत आह निष्कलस्येति पूर्णस्येत्यर्थः कुतो निष्कलत्वं ज्ञानसुखादिगुणत्म कावयवयोगादित्यत आह अगुणत्वत इति ज्ञानसुखयोः स्वरूपत्वा त्ससर्गेगुणस्य चासङ्गमय्यासंभवाद्गुणतोऽपि विभागशून्यस्य न ग त यं प्राप्यं गतिः प्राप्तिर्वा विद्यत इति न तत्साधननिष्पादनविधानावकाश इत्यर्थः ३६

किंचाज्ञानोपाधिं विनात्मनि नित्यमुक्ते कस्य पि विशेषस्योत्प्रेक्षि तुमशक्यत्वादज्ञानस्य च ज्ञानस्वभावे व तुतोऽसभा यमानत्वान्न कदा प्यात्मनः क्रियायो यतेति स्थिते कुत इदानीमज्ञानप्रतिभासस्याप्यभावे कर्मविधिशेषता स्यादित्यभिप्रेत्याह

चि मात्रज्योतिषो नित्य तमस्तस्मि विद्यते
कथ कार्यं ममैवाद्य नित्यमुक्तस्य शि यते ३७

चि म त्रेति तस्मिन्नात्मनि तमः स्वरूपतः प्रतिभासतोऽपि न विद्यते कुत' चिन्मात्रज्योतिषः ज्योतिष्ट्वत इति भावप्रधानो निर्देश' सुगमम यत् ३७

किंचाज्ञानाभावे बाह्या तःकरण एतत्ससर्गाभावात्त विना प्रवृत्त्य भावान्न मे कर्मावसर इत्याह

अमन कस्य का चि त ग्नि य वानिन्द्रियस्य का
अप्रा ो मना शुभ्र इति सत्य श्रुतेर्वच ३८

अमनस्कस्येति प्राणमनोविहीनत्वे प्रमाणमाह अप्राणो हीति श्रुतेर्वच सत्यं सत्यार्थं निर्दोषतया स्वतःप्रमाणत्वादित्यर्थः ३८

अपरात्रादिकालस्य विविक्तपूतादिदेशस्य प्राच्यादिदिग्विशेषस्य

मनोविक्षेपराहित्यराहूपरागादिनिमित्तस्य च प्रतीक्ष या आत्मचि तने कर्त यत्वात्कथं कार्याभाव इत्याशङ्क्याह

अकालत्वाददेशत्वाद्दिक्त्व दनिमित्तत
आत्मनो नैव कालादेरपेक्षा यायत सद ३९

अकालत्वादिति सदात्मानं ध्यायतो यतेर्नैव कालादेरपेक्षा स्याति योजना तत्र हेतुरात्मनोऽकालत्वादित्य दिः आत्मस्वरूपस्य कालाद्यनिब धनत्वान्न तच्च ने तदपेक्षेत्यर्थः तथाचाह भगवा सूत्र कारः यत्रैकाग्रता तत्राविशेपात् इति ३९

ब्रह्मविदो देशकालादिसव्यपेक्षे कर्मण्यपेक्षाभावेऽपि प्रयागादितीर्थे स्यादपेक्षा गङ्गातीरे वसेन्नित्यं भिक्षुर्मोक्षपरायण इत्य दिस्मृतिविहि तत्वादित्य शङ्क्य ब्रह्म त्मज्ञानरूपे तीथे स क्षा मुक्तिहेतौ स्नातस्या त्मविदो न तार्थ तरापेक्ष स्तीत्याह

यस्मि देवाश्च वेदाश्च पवित्र कृत्स्नमेकताम्
व्रजेत्त मानस तीर्थ यस्मि स्नात्वाऽमृतो भवेत् ४

यस्मिन्निति यस्मि ब्रह्मात्मस्फू तिरूपे देवास्तत्तीर्थस्थानविशे षा धिष्ठातारो माधवविश्वेश्वररामेश्वरत्रिविक्रमादयः पूजादर्शनस्पर्शनस्मर णादिभिर्भक्तपावनाः प्रसिद्धास्तथा वेदाश्च ऋ यजुःसामाथर्वाख्या अ व्ययनब्रह्मयज्ञपाठानुष्ठानादिभिः पावयन्ति तथा कृत्स्नं पवित्रं पावनं तीर्थविशेषं हरिहरनामोच्चारणादि एतत्सर्वमेकत्वं व्रजेत् यस्मि सरित इव सागरेऽ तर्भव तीत्यर्थः सर्वात्मकब्रह्माविर्भ वरूपत्वादिति परमो हेतुरत्रानुसंधेयः त मानसं मनसि वेदा तमहावाक्यजनि ता त करणवृत्तिरूपे समुल्लसितं मानसं तीर्थं संसारपापमूलाविद्याता रकम् तीर्थत्वं स्पष्टयति यस्मिन्निति यस्मि स्ना त्व निमज्ज्योद

कराशौ निक्षिप्तोदकबिंदुवत्तदेकता प्राप्य इत्येतत् अमृतो भवेन्निर्वि शेषनित्यात्मस्वरूप एव भवेत् त सिंस्तीर्थे नित्यं निमग्नस्य न तीर्थान्त रापेक्षेति भावः तथ च श्रुतिः शतं शुक्राणि यत्रैकं भवन्ति सर्वे वेद यत्रैकं भवन्ति सर्वे होतारो यत्रैकं भवन्ति स मानसीन आत्मा जनानां इति यथोदकं शुद्धे शुद्धम सिक्तं तादृगेव भवति एव मुनेर्विजानत आत्मा भवति गौतमेति च ४

एवं कृतार्थत्वापादक ज्ञानतीर्थं केनोपायेन प्राप्यमित्यपेक्षायां पूर्वोक्तः पदार्थविवेक एव तल्लभोपाय इति वक्तु प्रथम स्थूलदेहा यत्वमात्मनो विशदयति

न चास्ति शब्दादिरनन्यवेद्य परस्परेणापि न चैव दृश्यते परेण दृश्य यथा रसादयस्तथैव दृश्या त एव दैहिका ४१

न चास्तीति शब्दादिर्गन्धान्तो विषयोऽनन्यवेद्यो न चास्ति स्वयंप्रकाशस्तावन्नास्तीत्यर्थः तथा परस्परेणापि शब्देन स्पर्श स्पर्शेन शब्द इत्येवं परस्परेणापि न चैव दृश्यते प्रकाश्यते जडत्वा देवेत्यर्थः दर्शनमन्तरेण व्यवहारानुपपत्तेर्दर्शनस्य स्वत परस्परत श्चाभावे परिशेषात्परेण स्वविलक्षणेनाजडेन प्रकाश्या एव तुशब्दो ऽवधारणार्थः तथाच दैहिका अपि रसादयः परेण दृश्याः दृश्यत्वा द्यथा बाह्यरसादयस्तथैवेमे तस्मात्तथेत्यक्षरार्थः ४१

तदेवं पञ्चभूतात्मकात्स्थूलाद्देहात्तद्द्रष्टारमात्मानं विविच्य सूक्ष्मा दपि देहात्तं विविनक्ति

अहं ममेत्येष विक्रिया द दिह द

श्यत दृश्यत्वयोगाच्च परस्परेण ते न दृश्यता याति तत परो भवान् ४२

अहममेति अहमहङ्कारः एषणयत्नविक्रियासुखादयः कमप्र यत्नकर्तृत्वभोक्तृत्वसुखदुःखमोहद्वेषादयो ममेति निर्दिश्यमाना मनो वृत्तयस्तद्वच्छब्दादिवन्ना यवेदनाः कुतः इह व्यवहारभूमौ प्रदृश्यतो दर्शनकर्मत्व ते परस्परेणापि दृश्यतां न यान्ति न प्राप्नुवन्ति दृश्यत्व योगादेव परिशेषात्तेषां द्रष्टा ततस्तेभ्योऽहंकारादिभ्यस्तत्सघातरूपा लिङ्गदेहादिति यावत् भवानात्मा परोऽ य इति योजना ४२

यद्यप्येवं देहद्वयग्राहकत्वात्तदतिरिक्त एवात्मा तथापि तत्संब ध प्रतीतेस्तस्य न नित्यमुक्तरूपतेत्याशङ्क्य ह

अहङ्क्रियाद्य हि सम विक्रिया सकर्तृका कर्म फलेन सह । चिति रूपेण स ततोऽर्कवत्प्र क श्यमानाऽसितत त्मनो ह्यत ४३

अहङ्क्रियेति अहंक्रियाहंकरणमहंममेत्येवमाद्या समस्तविक्रिय चितिस्वरूपेण चैत यप्रकाशात्मनाऽर्कवदर्केणेव सम ततः प्रकाश्यमाना हि यतोऽत आत्मनोऽसितत ऽबद्धता सिद्धा विक्रियासंब धस्य वि दृश्यत्वाद्द्रष्टृधर्मत्वानुपपत्तेर्न मुक्तिविरोध इत्यर्थ ४३

एवं देहद्वय विविक्तस्याप्यात्मनः प्रतिदेहं परिच्छिन्नत्वान्न ब्रह्मात्मना पूर्णता सिध्येदित्याशङ्क्याह

शि रू हि सर्वदेहिना वियद्यथा य प्य म नास्ववस्थित अतो न स्म द रोऽस्ति वेदि । परोऽपि तस्मादत एक ईश्वर ४४

दृशिस्वरूपेण हीति हि यतः आत्मा सर्वदेहिनां मनांसि

दृशिस्वरूपेणैव व्या य घटादीनि वियदिवावस्थितो न परिच्छिन्नरूपेण अतस्तस्मादात्मनश्चितिस्वरूपादपरो जावो वेदिता नास्ति तथा पर ईश्वरोऽपि तस्माद् यो वेदिता नास्ति चितिस्वभा त्व विशेषत्वात् तस्मादेकएवात्मेत्यर्थः आत्मा न स्वरूपभेदवानुपाधिपरामर्शम तरेणाविभा यमानभेदत्वादाकाशवदिति भावः ४

देहद्वयसाक्षी ब्र स्वभावश्चेदात्मा कथं तर्हि तस्य नास्तिताशङ्का केपांचिदित्याशङ्क्य स्वदोपवशादेवेत्यभिप्रेत्याह

शरीर द्धोयदि च दृश्यता निरा व दा सु
निर कृता म । परश्च शुद्धो विशुद्धिकमत
सुनिर्मल सर्वगतोऽसितोऽद्वय ४५

रीरेति शरीरबुद्ध्यो स्थूलसूक्ष्मदेहयोर्यद्य येन नित्यसद्रूपेण दृश्यता पूर्वोक्त यायेन सिद्धा तदा निरात्मव दाः शून्यक्षणिकाद्यात्मवादा मया निराकृता एवेत्यर्थः तथाच अविशुद्धिकरात्कमतो धर्माधर्मादिलक्षणात्कर्मणः परो यतिरिक्तस्तत्साक्षित्वादतश्च शुद्धोऽकर्ताऽतश्च सुनिमलः कर्मफलभोगमललेशेनापि रहितः सर्वगतोऽपरिच्छिन्नोऽत एवासितो ब धनशून्यश्चेत्यर्थः ४५

भवेदेतदेव यदि शरीरबुद्ध्योरात्मन्दृश्यता सिध्येत्सा तु न संप्रतिपन्नेत्याशङ्क्य तयोरात्मदृश्यत्वाभावे बाधकमाह

घटादिरूप यदि तेन गृ ते न वृत्त बहुधा
स्ववृत्ति भि अ द्वयचिद्रूपवि कारदो त मते
यथा रयि न प यते ४६

घटादीति यदि ते तव मते स्ववृत्तिभिर्बहुधा प्रवृत्तं घट दिरूपं विषयाकार मनोऽन्येनात्मना न गृ ते न प्रकाश्यते तद त्मनो

मनो यत्वासिद्ध वशुध्यचिद्रपविकारदोषदुष्टता यथा मतेर्बुद्धेस्तथा वारयितुं न शक्यते तस्य साक्षित्वानभ्युपगमे सति मतिदोषाणां तस्मिन्नवश्यंभावात्तथाचानिर्मोक्षप्रसङ्ग इत्यर्थः अथवा यद्यपि शरीरद्वयग्राहकतया तद्न्य आत्मा नित्यसद्रूपस्तथ पि दृश्यसंसर्गकृत दोषो न परिहर्तुं शक्यते स्वचैतन्याभेदेन हि दृश्यमवभ सय द्रष्टा भवति अ यथा दृश्यस्य परोक्षानुपपत्तेरतो विशुद्धत्वाद्यनुपपन्नमिति शङ्कते घटादिरूपमिति स्ववृत्तिभिर्बहुधा प्रवृत्तं घटाद्याकारं मनो यदि तेन चेतनात्मना गृह्यते तदा तस्य दृश्यसंब धादशुद्ध्य दिदोषता वारयितुं न पार्यते यथा मतश्चेत यसंसर्गाच्चिच्छायतां वारयितुं न पार्यते तद्वदित्यर्थः ४६

स्यादेतदेवं यदि मतिवत्स वयं परिच्छिन्न परिणामि चात्मस्वरूपं स्य न्नैवम त्मस्वरूपमतो न स्याशुद्ध्य दिशङ्कावकाश इति दृष्टा तेनो पप दयन्नुत्तरमाह

यथा विशुद्ध गगन निर तर न सज्जते नापि च्च
लि यते तथा सम भूतेषु सदैव ते वय सम
सद त्मा ह्यजरोऽमरोऽभय ४७

यथा विशुद्धमि ति विशुद्धं परिणामविक्रियामलरहित निर तरमपरिच्छिन्नमतएव निरवयवं चेति द्रष्टव्यम् एवंविधं यथा गगन न सज्जते काष्ठेन जतुवन्न संलग्नं भवति न पिं लिप्यते भल्लातकरसेनेव वस्त्र दि तथात्मापि विशुद्धो निर तरो निरवयवश्च शास्त्रान्निश्चितो न बुद्ध्यादिषु सज्जते नापि तद्दोषेण लिप्यत इत्यर्थः अत्र शास्त्रप्रसिद्धिं हिश देन द्योतय हेतुमाह समस्तभूतेष्विति तत्तदभिमानिदेवतासहिते वपि समस्तभूतेषु अयमात्मा सद समो हि

यस्मात्तस्मादजरोऽमरोऽभयो नित्यशुद्ध इत्यर्थ तथाच शास्त्रं यः सर्वेषु भूतेषु तिष्ठ सर्वेभ्यो भूतेभ्यो तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं य सर्वाणि भूता य तरो यमयत्येष त आत्मा तर्य म्यमृत इति समं सर्वेषु भूतेपु तिष्ठ तं परमेश्वरम् विन श्यत्स्वविनश्य तं य' पश्यति स पश्यति न लिप्यते लोकदुःखेन बाह्य'इत्यादि ४७

किंच दृश्यस्य बाधितत्वादपि न तत्कृतदोषसंब ध आत्मनः संभा व्यते नहि मिथ्यार्थेन सत्यं वस्तु संसृज्यते कथं ब धितत्वमिति चेत्प्रतिपन्नोपाधौ निषिध्यमानत्वाद्रज्जुसर्पादिवदित्यभिप्रेत्याह

अमूर्तमूर्तानि च कर्मवासना दृशि रू स्य बहि प्रकल्पिता अविद्यया ात्मनि मूढदृष्टिभिरपोह्य नेतीत्य शेषितं दृशि ४८

अमूर्तेति अमूर्तं च मूर्तानि च अमूर्तमूर्तानि पञ्चमहाभूता त्मकानि स्थूलानि द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चे ति श्रुतौ दृशिस्वरूपस्य ब्र ण' सब धीनि श्रुतानि च अपरं कर्मवासनाश्रय लिङ्गमिति यावत् तदपि तस्य हैतस्य पुरुषस्य रूपं यथा महारजन वास इत्यत्रोक्त एतत्सर्वं सकारणं मूढबुद्धिभिरविद्यया मोहरूपया आत्मनि दृशिस्वरूपे प्रत्यगात्मनि ब्र णि प्रकल्पितं वासनाप्रकल्पि ताऽमूर्तमूर्तानि प्रकल्पितानीति योजना हि यस्मादविद्याध्यस्त मात्मनि सप्रपञ्चत्वं तस्म न्नेतिनेतीति वीप्सया तत्सर्वमात्मनो बहिर पोह्यात्मविशेषणतारूपं बाधित्वा केवलं दृशिश्चि मात्र एव वशेषित. सत्यस्य सत्यम् इतिश्रुत्येति योजना यदा प्रकल्पित इति विस र्गा तपाठस्तदैव योजना अविद्यया मूढदृष्टिभिरात्मनि प्रत्यग्रूपे

प्रकल्पिता आरोपिताः कर्मवासना मूर्तमूर्तानि च भूतानि दृशि स्वरूपस्य प्रत्यक्स्वरूपस्य ब्रह्मणो बहिर्नेतिनेतीत्यपोह्य दृशिरेवावशेषितो निषेधावाधभूतः श्रुत्या हि यस्मात्तस्मान्नास्त्यात्मनि दोषसंसर्ग इति ८

स्थूलसूक्ष्मप्रपञ्चस्य श्रुत्या बाधमुक्त्वा दृश्यत्वादिति युक्त्यापि बाधमाह

बोधरूप मनसोऽर्थयोगज स्मृतौ च सुप्तस्य च दृश्यतोऽर्थवत् थैव देहप्रतिमानत पृथग्दृशे शरीर च मनश्च दृश्यत ४९

प्रबोधेति अर्थयोगाद्विषयसबन्धाज्जातं मनसः प्रबोधरूप विषयाकारवृत्तिरूपं यत्तत्स्मृतौ स्मृत्यवस्थायां सुप्तस्य पुंसः स्वप्नावस्थायां चार्थवदर्थाकारमेव दृश्यते तद्यथा स्वप्नस्मृत्योरर्थाभावेऽप्यर्थाकारं दृश्यमानमात्मनः पृथगेव नात्मविशेषणं तद्दृश्यत्वात्तथैव दृश्यतो दृश्यत्वहेतोः शरीर मनश्च देहप्रतिमानतो देहप्रतिमानं च तसे सार्वविभक्तिकत्वाङ्गीकारात्प्रथमार्थः स इह गृह्यते देहद्वय वासनारूपं च दृशेरात्मनः पृथक् न दृशिविशेषणमिति योजना अत आत्मन्येव दृश्यस्यात्मनि निषेधान्मिथ्यात्वं शुक्तिरूप्यादिवत्सिद्धमिति भावः ४९

ननु श्रुत्या यद्यध्यस्तनिषेधेनात्मा प्रतिपाद्यते तदा निवृत्तसंसारत्वविशेषयोगाद्विक्रियावत्त्वेनानित्यत्वादिदोषप्रसङ्ग इतिचेन्नेत्याह

स्वभावशुद्धे गगने घनादिके मलेऽपयाते सति च विशेषता यथा च तद्वच्छ्रुतिवारितद्वये दा ऽविशेषो गगनोपमे दृशौ ५०

स्वभावेति यथा स्वभावशुद्धे शुद्धस्वभ वे गगने अधिष्ठाने घनादिके मले सति तस्मिन्नपयाते वा ऽविशेषता न विशेषः कश्चि दस्ति अविक्रियमेव सदा गगनमित्यर्थः तद्वद्दृशावात्म यधि ने गगनोपमे स्वभ वशुद्धे श्रुत्या वारितं बाधित द्वयं यस्मिंस्तस्मि सदैवा विशेषः कूटस्थतेति योजना तथा संसारनिवृत्ते र्मिथ्यार्थप्रतियोगिकाया अधिष्ठानदृग त्म यतिरेकेणानिरूपणान्न कोऽपि विशेषइति भावः ५

इति चतुर्दश स्व स्मृतिप्रकरणम् १४

ना यद् य० करणम् १५

ननु स्वभावशुद्ध आत्मा तथासति साधनवैय र्थ्यात्किंतु संसारि स्वभाव एव सन् ज्ञानध्यानादिसाधनानुष्ठानेन स्वभ वशुद्धब्रह्मस्वरूपो भविष्यतीति केचिदेकदेशीयाः प्रतिपेदिरे तन्न श्रद्धेय मुमुक्षुभि स्तस्य श्रुतियुक्तिबाधितत्वादित्याह

ना यद यद्भवेद्यस्म । यत्किंचिद्विचि येत्
अ स्या यत्वभावे हि नाशस्तस्य ध्रुवो भवेत् १

ना यदिति जीवब्रह्मणोरत्य तं भेद इष्यते किंवा भेदाभेदौ नान्त्यौ विरुद्धस्वभावतया ब्रह्माहमित्येकरूपध्यानज्ञानयोरसभवात्तदसं भवे चासंस रिब्रह्मभावफल निष्पत्तेरिति मनसि निधायाद्ये दोषमा० ना यद यद्भवेद्यस्मादिति यस्माद यज्जीवरूपं स्थितं सद यद्ब्रह्म न भवेत्तद्रूपस्थितिविरोधात् तथा तदेव ब्र णोऽ यज्जीवरूप वस्तु नष्टं सदन्यद्ब्रह्म न भवेन्नष्टत्व देव तस्य ब्रह्मभावं प्रादुरभावादिति योजना ब्रह्मैव स ब्रह्माप्येती ति श्रुतिविरोधः स्फुट एवेति नात्रोदाहृत यस्मादेवं श्रुतियुक्तिविरुद्धमिदं मत तस्मा त्किंचिदीष म त्रम य यद्भ

ह्मेति न विचि तये मुमुक्षुरिति शेषः किं त्वहमेव ब्रह्म ब्रह्मैवाहमिति भेदोपमर्देनैकरूपमेवात्मवस्तु चि तयेदित्यर्थः न व यस्याप्य यात्मता दृष्टा साधनविशेषसाध्या यथौ षधविशेषयोगात्त म्रादेरपि सुवर्णत्मता तद्वदिहापि स्यादित्याशङ्क्याह अ यस्येति जीवस्य स्वविरुद्धस्व भ वस्यान्यब्रह्म येकीभ वे तप्तायोगोलकप्रविष्टोदकबि दुवत्तस्य नाशो ध्रुवो भवेत् तथाच न ब्रह्मभ वः पुरुषार्थः किंत्वनर्थार्थः स्यादि त्यर्थ न्ष्ट तोऽसंप्रतिपन्नो वस्त्ररूप भिभावकनील्य दिवत् रस विशेषस्य ताम्ररूप भिभ वकम त्रत्वात्काला तरे सुवर्णाकारतापगम दर्शनाच्च ताम्रादेस्ततश्च भ्रमम त्रं तदित्यभिप्रायः १

ननु यद्येवम यत्र ध्येयं स्व त्मनि च ध्यान न संभवत्येकस्मि ध्यातृध्येयभ वायोगात्कथ तर्हि निदिध्यासनविधिरिति चेत् यथैवो पपत्तेर्न तदर्थं भेद आस्थेय इत्याह

स्मरतो दृश्यते दृष्टं पटे चित्रमिवार्पितम् ।
यत्र येन च तौ ज्ञेयौ सत्त्वक्षेत्रज्ञसंज्ञकौ ॥ २ ॥

स्मरत इति दृष्टं नीलपीतादि स्मरतः पुंसो यत्रा तःकरणे तद्भास ।रूपं पटेऽर्पितं चित्रमिव दृश्यते येन च चैत यात्मना दृश्यते उपलभ्यते तौ सत्त्वक्षेत्रज्ञसंज्ञकौ यत्र दृश्यते तत्सत्त्वं येन दृश्यते स क्षेत्रज्ञ इत्यर्थः तथाचात्मा निदिध्यासित य इति विधिना नैर तर्येण त्वंपद र्थविवेकसंपादनमेव कर्तव्यतयोच्यते विविक्तत्वमर्थ स्यैव ब्रह्मत्वादहंब्रह्मास्मीत्यपरोक्षानुभवसंभवात्संसारनिवृत्तिफलसिद्धिः अ यभावन यां तु प्रागुक्त यायेना यस्या यात्मतायोगात्संसारानिवृत्ते र्नि फलो विधि स्यादिति भाव २

अ तःकरणस्याप्रत्यक्षत्वात्कथ स्मृत्यवस्थायां तस्मिन्नीलपीताद्युप लम्भ इत्यत आह

फल त चानुभूत यद्युत कर्त्रादिकारै
स्मर्यमाण हि क स्थ पूर्व कर्मैव तच्चित ३

फला तमि फला तं सुखादिफलावसानं कर्त्रादिकारकैर्युत यद्वृत्तं पूर्वमनुभूतं तदिदानीं स्मर्यमाणं कर्मस्थं दृश्यनिष्ठं दृश्यते न द्रष्टृनिष्ठम् हि यस्मात्तस्मात्पूर्वमपि तत्स्मर्यमाणस्याधिकरणम त'करण च्चित आत्मनः कर्मैव दृश्यमेवेत्यर्थ अयंभावः पूर्वानुभूतविष य कारा हि वृत्तिर तःकरणपरिणामात्मिका स्मृतिरित्युच्यते तस्यां हि विषयो भासमानः साश्रयो भासते नहि तद स क्षिणानुभूय मानस्य विषयस्य बहिराश्रयेऽवस्थानमस्ति तथाचेदं स्मरामीति परा मर्शयो यतया दृश्यस्थतयानुभवस्यावश्यंभाव त्तदा चित्तमेव स्मर्य माणाधिकरणतया दृश्यत इति सिद्धम त'करणस्य साक्षिप्रत्यक्षत्व मिति ३

अ त्मैव द्रष्टा दृश्यं चेति भाट्टा मेनिरेऽतः स्वगतमेव वासन रूप म त्मा पश्यतीतीदं स्मरामीत्यनुभवस्या यथासिद्धत्वान्ना तःकर णस्य साक्षिप्रत्यक्षतेत्याशङ्क्याह

द्र श्चा यद्भवेद्दृश्य श्यत द्ध ८ दा
२ द्र । सजातीयो न धी ८ क्षि य । ४

द्रष्टुश्चेति विमतं दृश्यं द्रष्टुरत्य तं भिन्नं दृश्यत्वाद्घटवदित्युक्ते दृश्ययोर्भेदेपि परिण मत्वेन स जात्यसंभव द्रष्टुः सज तायमेतद्दृश्य मित्य शङ्क्याह दृश्यादिति द्रष्टा सदैव दृश्यासजातीयो दृश्यांश स्य चेतनत्व दात्मत्वानुपपत्तेरित्यर्थ' विपक्षे दोषम ह न धीवदिति

अ यथा द्रष्टृदृश्ययोरसजातीयत्वानङ्गीकारे द्रष्टुः परिणामित्वाज्जीव त्साक्षिता अ त्मनो न स्यादित्यर्थ ४

ननु भवत्येवात्मा साक्षी तस्य ब्राह्मण्यादिजातिमत्तया सविशेष-त्वात्कर्माधिकारित्वेन परिणामित्वोपपत्तेरित्याशङ्क्य ह

स्व त्म द्धिमपेक्ष्यासौ विधीना स्य त्प्रयोजक
जात्य दि शव त्तेन तद्ध नात्म । यथ ५

स्वात्मे ति असौ जात्यादिर्ब्राह्मणत्वादिः अ दिश द द्ध्योव स्थ दि गृह्यते स्वात्मबुद्धिं स्वस्मिन्नात्मीयाभिमानलक्षणां मिथ्यादृष्टि मपेक्ष्य विधीनां प्रयोजकः प्रवर्तक. स्यान्नान्यथा यथा शव उत्क्रान्त प्राणो देहो मम माता मम पित वेत्यध्यासानुसारेण संस्कारप्रयो जको दृश्यते तदभावे न दृश्यत इति योजना तेन हेतुना तद्वच्छ ववदेव जात्य दिरात्मधर्मो न भवतात्यर्थः अ यथा जात्यादिमत्त्वे त्वात्मनो घटादिवदनात्मता प्रसज्येतेति योजनीयम् तस्मात्साक्ष्ये व त्म न कर्माधिकारितया परिणामीति भावः ५

ननु नाध्यासनिबन्धन कर्तृत्वं विदुषोऽपि मोक्षाय क्रियानुष्ठा नादितिचेन्नेत्याह

न प्रि ाप्रिय इत्युक्तेर्नादेहत्व क्रिय फलम्
देहयोग क्रिय हे स्तस्म द्विद्वान्ि यास्त्यजेत् ६

न प्रियेति अदेहत्वमशरीरत्वं हि मोक्षस्तत्र क्रियाफल तु सुखदुःखे प्रसिद्धे ते तु नाशरीरस्य द्द श्रुते वा अशरीर व व सन्तं न प्रियाप्रिये स्पृशत इत्युक्ते श्रुत्यैवमुक्तत्वादित्यर्थ क्रिया हेतुर्यस्य स क्रियाहेतुर्देहयोग' क्रियया देहसंबन्ध एव साध्यो न मोक्ष त्यर्थ. सादेव तस्माद्विद्वान्न कर्मसाध्या मुक्ति किंतु

ज्ञानैकसाध्येति जानन् क्रिया. सर्वाणि सहकाराणि कर्माणि त्यजेत् सं यस्य श्रवणादिनिष्ठो भवेदित्यथः ६

ननु सर्वेषां कर्मणामात्मकर्तव्यत्वप्रतीतेर्न विद्वान्क्रियास्त्यक्तुं शक्नुयादिति चेन्नेत्याह

कर्म त्म न्नश्चेन्निवृत्तं च तथे य म्
अदेहत्वे फलेऽकार्ये ज्ञाते कुर्यात्कथं क्रि य ७

कर्मस्विति आत्मा चेत्कर्मसु स्वतन्त्रः कर्ता तर्हि निवृत्तं च कर्मत्यागरूपं च तथेयताम् यथा रागादिमान् प्रवृत्तिलक्षणे कर्मणि स्वतन्त्रस्तथा विशुद्धसत्त्वो वीतरागस्तत्त्यागेऽपि स्वतन्त्र इ यतां कर्मसाध्यफलाभिलाषाभावे कर्मत्यागस्यार्थप्राप्तत्वादित्यर्थ. एतदेव स्पष्टयति अदेहत्व इति देहसंबन्धशून्ये फले मोक्षलक्षणे अकार्ये केनापि कर्मणाऽसाध्ये शास्त्रादिना ज्ञाते सति क्रियाः कथं कुर्यान्न कुर्यादेव ताभिः प्रयोजनाभावादित्यर्थः ७

किं क्रियापरित्यागमात्रेणाकार्यं विदेहकैवल्यं प्राप्यते नेत्याह

जात्यादीन्परित्यज्य निमि मणा ध
कर्महेतुविरुद्धं यत्स्वरू ाास्त्रत स्मरेत् ८

जात्यादीनिति बुधः पण्डितो बुद्धिमान् कर्मणां निमित्तभूताञ्जात्यादीन्संपरित्यज्य जात्याद्यभिमानं परित्यज्य यत्स्वरूपं कर्महेतुविरुद्धं कर्मनिमित्तोपमर्दकं शुद्धात्मस्वरूपं तच्छास्त्रतो यथा शास्त्रोक्तं तथा स्मरेत् अनुचिन्तयेदित्यर्थः ८

शास्त्रमेवोदाहरन्स्मर्तव्यमात्मरूपं विशदयति

आत्मै भूतेषु तानि स्मिंश्च खे था
पयगाद्व्योमवत् शुक्रं दीप्तिं दिष्यते ९

आत्मैक इत्यादिना यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु चात्मानं ततो न विजुगुप्सत इति मन्त्रार्थं पूर्वार्धेनोच्यते स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमिति मन्त्रार्थं सार्धश्लोकेनाह पर्यगादिति एषाक्षरयोजना सर्वभूतेष्वहमेक एवात्मा न चेतनभेदोऽस्ति तर्हि किं भूतान्यधिकरणमात्मनो नेत्याह तानीति तानि च भूतानि तस्मिन्नात्मन्येवाध्यस्तानि न ततः पृथग्वर्तन्ते तथाच स्वाध्यस्तसकलविकारानुस्यूतसत्तास्फूर्तिरूपो विकारोपमर्देनानुसंधेय इत्यर्थः खे यथेति अन्तःसुषिररूपेण बहिरवकाशरूपेण वर्तमाने आकाशे यथा भूतसंबन्धस्तथेत्यर्थः पर्यगादात्म व्योमवत्स्वसत्तामात्रेण परि समन्तादगाद्गतवान् सर्वमशेषमात्मना न किंचिद्व्याप्तमस्तीत्यर्थः तथाच ब्राह्मणं नैनेन किंचनानावृतं नैनेन किंचनासंवृतमिति शुक्रमिति मन्त्रपदं तस्य व्याख्यानं दीप्तिमदिति प्रकाशस्वभावं शुद्धं तदात्मस्वरूपमित्यर्थः ९

अव्रणमस्नाविरं इति पदयोरर्थमाह

व्रणस्नाय्वोरभावेन स्थूलं देहं निवारयेत्
शुद्धापापतयालेपं लिङ्गं च कायमित्युत १

व्रणेति क्षतशिराजालनिरासेन स्थूलदेहात्मत्वमात्मनोपोह्यमित्यर्थः शुद्धमपापविद्धमित्यनयोरर्थमाह—शुद्धेति शुद्धं रागादिदोषहीनमत एवापापं पुण्यपापहीनं तस्मात्कारणाभावादेव सुखदुःखादितदनुभवसंस्कारलेपहीनमित्यर्थः अकायमिति मन्त्रपदेन सूक्ष्मदेहात्मता निरसनीयेत्याह लिङ्गमिति निवारयेदिति सर्वत्रानुषङ्गः स्थूलसूक्ष्मदेहतत्कार्यतद्वासनाभ्यो व्यावृत्तः सम एकोऽपरिच्छिन्न आत्मेति सदा चिन्तयेदित्यर्थः १

य एवं यथोक्तमात्मानं वेत्ति स ब्रह्मविदामुत्तम इत्याह·

वासुदेवो यथाश्वत्थे देहे चा वी॰ मम्
तद्वद्वेत्ति य अ त्मान म स ब्र वित्तम ११

वासुदेव इति वासुदेवो भगवा कृ णोऽश्वत्थे निकृ ोपाधौ स्वदेहे च विर्भूतविज्ञानैश्वर्यशक्तिमदात्माधि ि ते उत्कृष्टोपाधौ च यथा सममविशिष्टमात्मानमब्रवात् अश्वत्थः सर्ववृक्षाणा मिति वृ णीनां वासुदेवोऽस्मी तिच तद्वद्य आत्मानं सममुपाधिकृतवैष या पोहेनैकरूप वेत्ति सोऽतिशयेन ब्रह्मविदित्यर्थः ११

वासुदेवस्य युक्तं सर्वत्र समात्मदर्शनं तस्योपाधिषु ममाह्कारर हितत्वान्नतु मुमुक्षोस्तस्य तद्वैपरीत्य दित्यत आह

यथा यशरीरेषु मम ह ता न चे यते
अ िश्च पि तथा देहे धीसाक्षित्वाविशेषत १२

यथा हीति अ यशरीरेषु बहिर्दृश्यमानेषु देहेषु यथा ममाह ता ममाहमोभावो न चे यते तस्य दृश्यत्वेनानात्मत्वनिश्चयात्तथाऽस्मिं श्चापि स्वत्वाभिमते देहे ममाह ता ने यते कुतः धीसाक्षित्व वि शेषतः उभयत्र देहाकारपरिणतबुद्धिसाक्षित्वाविशेषादित्यर्थः तथाच त्मतत्त्वालोचनायामहंकारादेरनवसरत्वाद्वासुदेववत्समात्मदर्शन युक्तमेवेति भावः १२

रागद्वेषभयोपल भान्नास्ति मुमुक्षोरभिमानाभाव इतिचेन्नेत्य ह

रूपस . र ल्याधी र गद्वेषौ भय च यत्
गृह्यते धीश्रय स्माज्ज्ञाता शुद्धोऽभय दा १३

रूपेति नीलादिरूपसंस्कारेण तुल्यः समान आधि आश्रयो ययोस्तौ रागद्वेषै रूपसस्कारतुल्याधी यच्च भय तदपि तत्समाना

श्रयमिति संस्कारो नाम स्वाश्रयस्य प्रागुद्भूतावस्थासमानावस्थान्त रापादकोऽतीन्द्रियो धर्मः ततश्चायमर्थः रूपाद्य कारपरिणतान्त. करणे हि रूपादिसंस्कार पुनरपि रूपाद्याकारपरिणामहेतुर्विद्यते तत्रैव च रागद्वेषौ रूपादिदर्शननिमित्तौ तन्निमित्तकं च भयं तत्रैव काम' सकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे तिश्रुते यस्माद्धीश्रय बुद्धिसंश्रयमेव रागद्वेषौ भयं चेति त्रयमात्मना गृ ते नात्मसंश्रयं तस्माज्ज्ञाता शुद्धो रागादिरहितो ऽभयश्च सदेति १३

ननु सदा शुद्ध आत्मा किंतु यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति इति श्रुतेः यं यं वापि स्मर भ वं त्यजत्य ते कलेवरम् तं तमेवैति कौ तेय सदा तद्भावभावित इति स्मृतेश्च पूर्वमशुद्धोऽपि पुरुषो ब्रह्मभावनया शुद्धः पश्चाद्ब्रह्म भवि यतीत्याश· ङ्कयाह

य मन स्तन्म ाोऽ यत्वे त्म८ मौ क्रिय ८ नि
आत्मत्वे चानपेक्षत्व ८ पेक्ष हि न तत्स्वयम् १४

य मना इति यस्मि ध्येये देवादौ मनो यस्य स य मन ध्यायी पुरुषः स त मयो ध्येयदेवादिमयो भवति ध्यातृध्येययोर यत्वेसति ध्य नक्रियायास्तत्रार्थवत्त्वसभवादित्यर्थ न पुनरात्म त्वात्मै अ त्मस्वरूप वस्थानप्राप्त्यर्थम त्मनि क्रिया ध्यानादिरूपापेक्ष्यत इत्यर्थः तत्र हेतुः आत्मत्वेति मोक्षरूपस्य ब्रह्मण आत्मत्वेसति तस्य चतुर्विधक्रियाफलविलक्षणत्व त्क्रिय या अनपेक्षत्वादित्यर्थ मोहमात्रव्यवधान च्चात्र न क्रियापेक्षेति चकारार्थः विपक्षे दोषमाह सापेक्ष हीति यदि क्रियासापेक्षं कैवल्यं भवेत्तर्हि त स्वयमात्मरूप

न स्यात् क्रियासाध्यस्य नात्मत्वादनित्यत्व चेत्यर्थ तस्मात्सदा शुद्ध एवात्मा तस्मिन्नशुद्ध्याभासो मिथ्याध्यास इति भावः १४

विभागादिमलाभाव च्चि देकरसत्वाच्चात्मा सदाशुद्ध ए भ्युपे इत्याह

मिवैकर । स्विरविम जराऽमल
च रा पध नात । वि री । विम व्यते १५

स्वमि ति यद्येवस्वभावैषा ज्ञप्ति हि तस्य जन्मविनाशभेद प्रतिभासा कथमित्याशङ्क्य चक्षुराद्युपाधिसंसर्गदोष दित्याह चक्षु रादीति ५

अ त्मन. प्रतिपादितममलत्व विशदयति

त्व दहमित्येषो न त्मधर्मो घटादिवत्
तथा ये त्यया । दो श्चात्माऽमलो त १६

दृश्यत्वा दिति अहमित्येषोऽहमिति प्रत्ययो नात्मधर्मो नात्म निष्ठो दृश्यत्वाद्धटादिवत्तथा येऽपि प्रत्यया परिणामा दोषा दोषरूपा रागद्वेषादयोऽन त्मधर्मा ज्ञेया· हि यस्मादत आत्माऽमलो हि निर्मल एवेत्यर्थ· १६

अहक रादीनामात्मधर्मत्वाभ वेऽपि नात्मनो विशुद्धि सिध्यति विकारित्वात्परिच्छिन्नत्वाच्चेत्याशङ्क्य ०

व त्य क्षित दविकारी च वंग
विक्रि यदि द्र । दीवाल्पविद्ध त् १

त्ययेति विपक्षे दोषमाह विक्रियेतेति विक्रियेत परिच्छि न्नो वा यद्यात्मा तदाल्पविद्विषयमात्रावभासको भवेद्बुद्ध्या दिवद्बुद्धिचित्तमनोवदित्यक्षरार्थ. बुद्ध्य दिश देन तद्गताभासो

क्ष्यते अ यथा स्वरूपतो चेतनत्वाद्भेदनयोगवत्त्वेनाऽपवित्त्ववचन मनुपपन्न स्यात्तत्र बुद्धेः साभास या विषयावभासनमात्रे उपक्षीणपरिणामाया यथापूर्वापरानुभूतितदवस्था तत्प्रचार नुसंधानाभावो विक्रियावत्त्व त्तथा द्रष्टुरपि विक्रियावत्त्वेऽनुसंधानाभावप्रसङ्ग त्सर्वव्यवहार विलोपप्रसङ्ग इति भाव. १७

द्रष्टुरात्मनोऽपि बुद्धिवदप्यवित्त्वमेव ज्ञानस्य साधनाधीनस्योत्पत्ति विनाशवत्त्वादितिचेन्नेत्याह

न दृष्टिर्लु य द्रष्टुश्चक्षुरादेर्यथैव तु
नहि द्र रिति ह्युक्त तस्माद्र । सदैकदृक् १८

न दृष्टि रिति यथैव चक्षुरादिद्वारकदृष्टिर्लुप्यते परिणामित्वात्त थ द्रष्टुरात्मनो दृष्टिर्लुप्यते अपरिण य त्मस्वरूपत्वात्तस्या इत्यर्थः तद्दृष्टेर्नित्यत्व नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वा दिति हि त्योक्तमित्यर्थः यस्मात्प्रमाणसिद्धमिदं तस्मादित्यर्थः सदेकदृक् एकरूपदृष्टिस्वभाव इत्यर्थः सदैकभुगि तिप ठे भुङ्क्ते पश्यतीति भुक् साक्षीत्यर्थ. १८

यस्मादेवमात्मा शुद्धस्वभावोऽपि सन्नुपाधिसंब धाद यथा प्रतीयते तस्मादात्मानं ब्र त्वेन प्रतिपत्तुं पदार्थविवेक कुर्य मुमुक्षुरित्याह

घातो वारि भूत ना कर ना तथैव च
स्त । य मो वारि को व स्मीति विचारयेत् १९

सघातो वेति अयमर्थः अहमिति तावदात्मावभासते स भ मानोऽह मनु य. कृशः स्थूल इत्यादौ भूतसंघात त्मकदेहरूपः स्फुरति तदिदमुच्यते सघातो व स्मि भूतान मिति तथाह द्रष्टा श्रोता रसयिता काणो बधिर इति करणेष्व यहमुल्लेखो

दृश्यते अ त'करणसंघ तो वाहमिति तत्रापि पृथक्पृथगेव द्र रदर्शनाद्यस्तमेकैक चेन्द्रियमहमस्मि अथवैकस्मि देहेऽनेक त्मत्वे कदाचिद्वैमत्यसंभवाद्भोग०्यवस्थानुपपत्तेर यतमो वास्मीन्द्रियसंघात द यो वा तदधि तास्मि यद्य यतमस्तर्हि स को वा तःकरणप्र णाद्य य तमः किं वा तत्साक्षी तद्विलक्षणस्वभाव इति विचारयेत् १९

विचारफलं पदार्थविवेकं कथयति

यस्त नाह समस्त वा भूः मिन्द्रियमेव वा
ज्ञेयत्वाद र त्व च ज्ञा योऽस्माद्घट दिवत् २

यस्त नाहमिति भूतं चेन्द्रियं वा समस्तं ०्यस्तं वा नाहमस्मि ज्ञेयत्वादचेतनत्वाद्घटादिवत् करणत्वात्कुठारादिवदिति यथायोग योज्यम् तस्माज्ज्ञाता चेतनोऽ योऽ तःकरणप्राणादिभ्योऽप्यचेतनेभ्य इति द्रष्टृदृश्य न्वयव्यतिरेकालोचनेन विवेकः कार्य इत्यर्थः २

इद नीं साक्षिसाक्ष्या वयव्यतिरेकालोचननावस्थात्रयविवेकद्व रा तत्साक्षिणस्तुरीयस्याधिगमप्रकारमाह

आ(`रिन्धन बुद्धिरविद्याक मकमभि
दीपि ज्वलत्येषा द्वारै श्रोत्र दिभि सदा २१

आ(। `रेत्य दिना तत्रैव सतीत्यत' प्र क्तनैः श्लोकैः अ तमै वाग्निस्तस्ये धना २ध्यते प्रकाश्यते व्यवहारयोग्य क्रियते अनयेती धना बुद्धि अ त्मचैत यस्य विशेषाकारतयाभिव्यक्तिकारणभूतेत्यर्थः साविद्याकामकर्मभिर्दीपिता उत्तेजिता वायुनेवाग्निस्थमि धनमाध्मा । सती प्रज्वलति चैत यग्रस्ततया प्रकाशमाना जायतेऽभि यक्ताग्निना दह्यमानमि धनमिवेत्यर्थ. गवाक्षेभ्यो निःसृतदीर्घप्रभान्यायेन श्रोत्रादिभिर्द्वारैर्नि सृता सती सदा प्रज्वलत्येषेति योजना अत्राग्नी

धनादिरूपकनिर्देशप्रयोजनं यवहारकाले विषयग्रहणस्य होमत्वभा ना तत्फल च विषये सक्तिनिवृत्तिरिति द्र व्यम् २१

एवंविधबुद्ध्यवस्था जागरणं तस्यामात्मा स्थूलपदार्थेषु भव तीत्याह

दक्षिण क्षि ध नेषु यदा द्धि र्विचे ते
विषयैर्हविषा दी । त्माग्नि स्थूलभु द २२

दक्षिणाक्षीति दक्षिणस्य ङ्गस्य पुरुषे श्रेष्ठत्वप्रसिद्धेरिद विशेषणम् दक्षिणमक्षि प्रधान मुख्यं येषामिन्द्रियाण तेषु बुद्धिर्यदा विचेष्टते व्यापारवती भवति हविःस्थ नीयैर्विषयैर्दीप्ता विषयं व्य प्य तदाक रेण दीप्यमाना सतीति यावत् तदा माग्नि स्थूलभुक् स्थूलवि षयाणां भोक्ता जागर्तीत्युच्यत इत्यर्थ २२

रूपकनिरूपणफलं स्पष्टयति

हूयन्ते तु ह ीं ीति रूप दिग्रहणे स्मरन्
अरागद्वेष आत्माग्नौ ज ग्रद्दोषैर्न लि यते २३

हूय त इति रूपादिग्रहणे विषयग्रहणसमये अर गद्वेष' शोभ नाशोभनाध्यासेन रागद्वेषावकु न् हवींषीम यात्माग्नौ हूय त इति स्मर ध्यायन्नात्मा जाग्रद्दोषैर्विषयोपलब्धिनिबन्धनै पुण्यापु यलक्षणै र्न लिप्यते न संश्लि यत इत्यर्थ २३

इदानीं स्वप्नावस्थामाह

म नसे गृहे यक्त सोऽविद्याकर्मवासनाम्
पश्यस्तैजस अ त्मो य योति क शि । २४

मानसे त्विति मनस परिण मोपाधिर्मानस गृहं स तत्राभि व्यक्त आत्माऽविद्याप्रयुक्तकर्मं ब्धा वासनाऽविद्याकर्मवासनेत्युच्यते

ता विषयाकारा पश्यस्तैजस इत्युक्तो विद्वद्भिः तेजसि वासनामये विषयेऽभिव्यक्त इति व्युत्पत्तेरित्यर्थ तत्र भासमानकर्मसुखदुःखा दीनां मनोमात्रत्व,तस्य च दृश्यत्वेनैव तद वस्थानादात्मन उपाध्य न्तराभावे सति बा स्य चादित्य दिज्योतिषस्तदानीमुपरमाद् त्मैव स्वयज्योतिः स प्रकाशिता साक्षी भवतीत्यर्थः तथ च श्रुतिः दृष्ट्वैव पुण्य च प प चे'ति अत्राय पुरुष स्वयंज्योतिर्भवती ति च २४

सुषुप्तिमाह—

विषय ास ा पि चो ` नैव कर्मभि
यदा द्धौ तद ज्ञेय ाज्ञ अ त्मा ह्यन यदृक् २५

विषया इति यदा बुद्धाव तःकरणे विषया स्थूलाः वास नाश्च सूक्ष्माः स्वप्नदृश्य श्च कर्मभिर्न चोद्य ते नोद्भूताः क्रियन्ते तदात्मा प्राज्ञो ज्ञेयस्तत्संज्ञकस्तदा भवतात्यर्थ प्रज्ञातिशयात्तदा प्राज्ञ इति युत्पत्तिमभिप्रेत्य विशिनष्टि अन यदृगिति अ यदात्मव्य तिरिक्तं विषयं वासनां वा न पश्यतीत्यन यद्दक् अपरिच्छिन्नप्रज्ञ इत्यर्थः २५

एवमवस्थात्रयं तदवस्थं चात्मान द्रष्टदृश्यभावेन विविच्येदानीम भिमानिसहित वस्थात्रयसाक्षितया विश्वादित्रयापेक्षया तुरीयं प्रत्यञ्च मात्मान नित्यविज्ञप्तिस्वभावमुपलम्भयति

मनो द्धीन्द्रिय ा या अ ा कर्मचोदिता
चैत येनैव भास्यन्ते रविणे घटादय २६

मनोबुद्धीति इन्द्रियाणामवस्था जागरणं मनोवस्था स्वप्न बुद्ध्यवस्था कारणावस्था सा सुषुप्तिरिति विभाग स्पष्टमन्यत् २६

ननु यद्यात्मा निर्विकार एव साक्षी कथं तर्हि बुद्ध्यादीनां कर्तो च्यते तत्राह

तत्रैवसति बुद्धीर्ज्ञ आत्मभ स वभासयन्
कर्ता ता । यदर्था । मूढैरेवाभिधीय २७

तत्रैवसतीति तत्र तस्मिन्नात्मनि एवंसति अवस्थात्रयेऽन्य स्ते सावस्थाः बुद्धीः आत्मभासा स्वचैत याभासेनावभासयन् ज्ञ आत्मा तास कर्तेति मूढैः शास्त्राचार्ये पदेशरहितैरभिधीयते यपदिश्यते इति योजना तथ व्यवह रप्रवृत्तौ निमित्तं सूचयन्बुद्धी विंशिनष्टि यदर्थास्ता इति यस्यात्मनः सुखदुःखप्रतिभासार्थ स्ता भ सयन्निति कर्मो द्भासितबुद्ध्यवस्थानुगतः चिदाभ साविवेकादात्मा दर्शनकर्तत्यु च्यते मूढैरित्यर्थः २७

एवमज्ञाने तत्कार्ये च प्रतिबिम्बितस्य चिदात्मनो ज्ञातृत्वमुपा धिनिब धन व्युत्पाद्य सर्वज्ञत्वं सर्वकर्तृत्वं च तस्यैव मायोपाधिप्रति बि बवशादिति व्युत्प दयति

सर्वज्ञोऽ तएव स्य त्स्वेन भासावभासयन्
सर्व सर्वक्रियाहेतो सर्वकृत्त्व तथात्मन २८

सर्वज्ञोऽपीति अतएवेत्युक्तमेव विशदयति स्वेनेति स्वात्मा श्रयविपयकमायाविवर्त सर्वं स्वचैत येनादित्यप्रकाशवदविकृतेन भास य सर्वज्ञ उच्यते न पुनः सर्वविषयज्ञानकर्तृत्वेनेत्यर्थः तथा तद्ध मा यानिब धनमेवात्मनः सर्वकृत्त्वं सर्वकर्तृत्वम् तदेवाह सर्वक्रिया हेतोरिति संनिधिसत्तामात्रेण भ्रामकवत्सर्वकारकप्रवृत्तिहेतुत्वादि दिर्थ. २८

तदेवमवस्थात्रयसाक्षितया विविक्तशुद्धचिद्रूपस्यात्मन कार्यकारणात्मकम योपाधिवश ज्ञ तृत्वकर्तृत्वसर्वज्ञत्वादि यवहारास्पदत्व न स्वभावत इत्युक्तमर्थमनूद्य किं तत्स्वाभाविकं बि वतुल्यमात्मस्वरूपमित्यपेक्षायां तदाह

सोपाधिश्चैवम त्मोक्तो निरुपाख्योऽनुप धिक
नि कलो निर्गुण शुद्धस्त मनो वाक्क ना त   २९

सोपा धिश्चेति   यस्तु निरुपाख्यो विषयतयोल्लेखयो यो न भवति सोऽनुपाधिकः सर्व यवहारातीत इत्यर्थः गुणावयवशून्यत्वाच्छुद्धः कूटस्थ इत्यर्थः निरुपाख्यत्वमुक्तं यनक्ति त मिति २९

मनोवागग यत्वं साधयति

चेतनोऽचेतनो वापि कर्ताकर्ता गतोऽग
बद्धो मुक्तस्तथा चैकोऽनेक शुद्धोऽ यथेति वा   ३

चेतन इति   अयमर्थः अहमिति शब्दप्रत्ययौ तावत्पराग या वृत्ततयात्मानं प्रत्यञ्चमवगाहेते इत्यविवादम् तौ चेच्छुद्धमेवात्मान गोचरयेतां तदा प्रत्यक्षोपल धे घटादाविव विवादिनां विप्रतिपत्त्यभाव एव स्य त् विप्रतिपद्य ते तु ते देहेन्द्रियमनोबुद्धीनाम यतमोऽचेतन एव चेतनो वा नात्मेति वेदबाह्याः तदन्यश्चेतन इति वेदव दिनस्तेष्वपि केचित्कर्तेति केचिदकर्तेति गतो यापकोऽगतोऽव्यापकोऽणुपरिमाणो देहपरिमाणो वेति केचिद्बद्धो जीवो मुक्तोऽ य ईश्वरस्तथा सर्वशरीरे वेकोऽनेको वा शुद्धो रागादिगुणरहितोऽन्यथा तद्युक्तश्चेति ३

अतो विप्रतिपत्तेरयथाभूतात्ममात्रगोचरत्वादसमर्थौ श दप्रत्ययौ शुद्धात्मनीत्याह

अ ा यैव निवर्त ते चोधीभि सहैव तु
निर्गुणत्वात्क्रियाभ ाद्विशेषाणामभावत ३१

अप्रा यैवेति कथमात्मप्राप्तिर्वाचां धिय मिति चेत्परमार्थतः प्रवृत्तिबीजाभावादित्याह निर्गुणत्वादिति रूपादिगुणहीनत्व द्वा ेन्द्रियद्वारकधीभिस्त वदात्मा न प्र प्यते मनसश्च बाह्येन्द्रियद्वारो पल धविषयातिरेकेण स्वतन्त्रस्य विषयानिरूपणात्तदगोचरमात्मान तत्र प्र प्नोति क्रियाभावाद्वात्मनो गोचरत्वाभ वः नहि क्रियाहीने ऽनवच्छिन्ने वस्तुनि क्रियावदनुगतिमात्रेणापूर्वधर्मोपजनि संभवति घटादिनानुगते गगने तददर्शनात् तस्य मन संयोगजज्ञानासंभव न्न मनसापि प्र प्य आत्मेत्यर्थः तथा विशेषाणा गोधनरूपाणां बाह्यान स्वगतानां वा जात्य दीनां प्रवृत्तिनिमित्तानामभावान्न श दोऽपि प्र प्नोत्य त्मानमित्यर्थ तथाच श्रुतिः यतो वाचो निवर्तन्ते अप्र प्य मनसा सहे ति न चक्षुषा गृह्यते नापि व चा नान्यैर्दे वैस्तपसा कर्मणा वे ति च ३१

अविषयस्यात्मनः कथ वेदा तवेदनीयत्वमित्याशङ्क्य लक्षणावर्त्म नेत्यभिप्रेत्याह

पक वतो योम मूर्तैं सर्वैर्वियोजितम्
यथा द्वदिह त्मान वि द्याच्छुद्ध पर दम् ३२

य पकमिति सर्वै मूर्तैः सर्वतो वियोजित परिच्छेदप्रति भासहेतूपाधिवर्जित यापक स्वरूपतोऽपरिच्छिन्नं च योम य ा तद्वदेव शुद्धमवस्थ त्रयोपाधिवियोजितमवस्थात्रयसाक्षितया लक्षितं शुद्धमात्म नमिह वेद तसमये पर पदं परमात्मानं ब्रह्म वि द्यादिति योजन ३२

एवमात्मतत्त्वेऽवधारिते पुनरवस्थ त्रयाभिम न न कुर्यादित्याह

हि ा स्मृ तिं स्मि स ं श्च मस्त्यजेत्
सवह योतिष क्तो दि कृ वर यथा ३३

ह मिति ऽष्ट ज गरित तद्धित्व द्रष्टा श्रोता म तेत्येवमेकै कक्रियोपरक्ततयात्माभिमानं त्यक्त्वेत्यर्थ' दशनाद्यवस्थ यामपि नि र्विशेषमेवात्मान म वीतेति भाव तस्मिन् दृष्टेऽर्थे स्मृ तिं स्वप्नं हि त्वा सस्कारद्वारकत्वात्स्वप्न एवेह स्मृतिरुच्यते अहं स्वप्ने देवोऽभूव याघ्रो वाभूवमिति तदभिमान हित्वेत्यर्थः दृश्यस्य सवासनस्य मनसो विकारोऽसौ नात्मन इत्यसंगतामात्मनोऽनुसदधीतेति भ वः तथा तमः सुषुप्तिं त्यजेत् तमसो विशेषण सर्वग्र इति सर्वं ग्रसतीति सर्वग्रः सा तमिद पदम् सुषुप्तेरप्यवभासकतयाऽलुप्तप्रकाशस्वभाव एवात्मा नतु मूढो ज्ञानवा वेति म वीतेत्यर्थ कोऽसाववस्थात्रयत्यक्तेति तमाह सर्वदृगिति सर्वदृक्सर्वसाक्षी प्रत्यगात्मा ज्योतिषा युक्त' ज्योतिषां ज्योति रित्युक्तेन ब्रह्मणैकाभूत इत्यर्थः यथा दिनकृत्सवित शर्वर्यां भव श वरं तम. स्वतेजसा ग्रसित्वा निस्तमस्क एवावतिष्ठते तथाऽवस्थाविकारहेत्वज्ञान ब्राह्मणज्योतिषाऽभिभूयाद्वयानन्दस्वभ व एवावतिष्ठतेत्यर्थः २३

उक्तमेव त्यागप्रक रं प्रकटयति

रूपस त्यन्धक र र्थां या य गोचरा
ए ा ा मो द्र ा र्वभू सर्वग ३४

रूपस्मृ ीति रूपस्मृत्यन्धकारा जाग्रत्स्वप्नसुषुप्तयोऽर्था विषया येषां प्रत्ययानां ते तथोक्ता ते यस्य साक्षिणो गोचराः प्रतिभ स्या स एवात्मा सर्वभूतेषु द्रष्टा तथापि समो निर्विशेषः यतः सर्वग परिच्छेदकरहित इत्यर्थ ३

यद्येवमुक्तस्वभाव एवात्मा कुतस्तस्मिन्विचित्र. ससारप्रत्ययोदय स्तत्राह

आत्मबुद्धिमनश्च विषयालोकसगम त्
विचित्रो जायते द्धे स्तयोऽज्ञानलक्षण ३५

आ० बुद्धीति अज्ञ नलक्षणोऽज्ञानोपाधिनिब धन इत्यर्थः ३५

अविद्यातत्कार्योपाधीनामात्मनश्च विवेकानुपलम्भादेव संसारप्रति भास इति स्थिते मुमुक्षोः कर्तव्यमुपदिशति

विवि य स्मात्स्वमात्मान वि द्या छुद्ध पर पदम्
द्रष्टार सर्वभूतस्थ सम सर्वभय तिगम् ३६

विवि च्येति अस्माद्बुद्ध्य दिसंघाताद्विविच्य स्वमात्मानं वि द्या दिति संबन्धः स्पष्टमन्यत् ३६

वेद्यमेवात्मरूपं पुनर्विशिनष्टि

मस्त सर्वग शा त विमल योमवत्स्थितम्
निष्कल निष्क्रिय सर्व नित्य द्व द्वैर्विवर्जितम् ३७

समस्तमिति समस्तमात्मानं सर्वं परं पदं ब्रह्मेति पृथक्प्र योऽयमपुनरुक्ततायै अत्र विधिमुखेन प्रतिषेधमुखेन च ये विशेष निर्दिष्टास्तानशेषा साक्षिणि त्वंपदार्थे तत्पद र्थे च ब्रह्म यनुसंधाया नयोस्तुल्यलक्षणत्व निश्चित्य तत्त्वमसिवाक्यादहंब्रह्मेति निश्चिनुया दिति तात्पर्या र्थः ३७

एवं ब्रह्मात्मरूपेणैव ज्ञातव्यमित्युक्ते पुनर्मुमुक्षु शिक्षयति

र्वप्रत्ययसाक्षी ज्ञ कथ ज्ञेयो मयेत्युत
वि श्यैव विजानीय ज्ञानकम ति ३८

वेंि सर्वप्रत्ययसक्षी ज्ञ नैकस्वभावो य उक्तः स कथ काहक्स्वभाव इति विमृशेदिति योजनीयम् कथशब्दसूचित विमर्शमेव विभजते ज्ञेय इति मया ज्ञेय उत न ज्ञेय इति शेषः यदि ज्ञेयस्तदापि ज्ञान प्रति कर्म वा न वेत्येव विमृश्य विजानीयात्तत्त्व मा मन इत्यर्थ' ३८

एवंविमर्शे ज्ञेय वपक्षस्ता न्न सगच्छत इत्याह

अद्द द्रष्टृविज्ञ त दृष्टमि त्यादि श नात्
नै `य मया यै ि पर कथचन ३९

अद्द मि ति यदि म यसे सुवेदेति दभ्रमेवापि नून त्व वेत्थ ब्रह्मणो रूप मिति ज्ञेयस्याऽपत्वोपदेशादब्र त्वापत्तेरदृष्टमविज्ञातमिति च श्रुतिशासनान्न ब्र ात्मतत्त्वं ज्ञानकर्मत्वेन मया अ यैर्वा कथंचन ज्ञेयमित्यर्थः ३९

यद्येवं ज्ञेयत्वं न संभवति कथ त ात्म येवात्म नं पश्येदित्याद्यु देश इत्याशङ्क्य विषयत्वेनाविर्भावमात्रमेवात्मतत्त्वज्ञान न वि यत्वेन यस्य मत तस्य मतं मत यस्य न वेद स इति श्रुतिरिति म वानो ऽज्ञेयत्वं पक्षमपि प्रतिक्षिपति

स्वरूपा॰ धाना॰ ा ानालो
अन्यज्ञानान `क्षत ७ चै दा ४

रूपेति यज्ज्ञ नस्वरूपादन्यज्जड च्च व्यवहित ज्ञानदेशा त्तदागन्तुकज्ञानसापेक्षसिद्धिकत्व ज्ज्ञानविषयतय ज्ञेय भवति न तथेदमात्मतत्त्वम् कथ तर्हि शृणु ज्ञ नालोकस्वभावतो ज्ञानप्र ाश स्वरूपत्व त्स्वरूपाव्यवधान भ्या हेतुभ्याम यज्ञानानपेक्षत्व दविषयत्वेन

विज्ञात भवत्यात्मतत्त्वमिति योजना ज्ञातुरेव ब्रह्मत्वोपदेशाज्ज्ञातुश्च ज्ञेयत्वानुपपत्तेरविज्ञातत्वाभावाच्च सदा मया ज्ञात च ब्रह्मात्मतत्त्व मित्यर्थः

ज्ञानस्वरूपस्य नान्यज्ञानापेक्षेत्येतद्दृष्टान्तेन साधयति

ना येन ज्योतिषा क र्यं रवेरात्मप्रकाशने
ोधा न्यबोधेच्छा बोधस्यात्मप्रकाशने १

न न्येनेति स्पष्टार्थः ४१

दृष्टा तस्य दार्ष्टान्तिकस्य च नैरपेक्ष्यमुक्तं साधयति

न तस्यै न्यतोपेक्षा स्वरूप यस्य यद्भवे त्
काशान रदृश्यो न काशो ह्यस्ति कश्चन ४२

न तस्येति आत्मा नान्यतो ज्ञानमपेक्षते तत्स्वरूपत्वात् यद्यस्य स्वरूप तन्नान्यतस्तदपेक्षते यथा प्रकाशरूप सविता न प्रकाशम न्यतोऽपेक्षते तथा चायं तस्मादेवमित्यर्थः. किंच नात्मा प्रकाशान्त रदृश्यः प्रकाशरूपत्वादादित्यवदित्याह प्रकाशान्तरेति ४२

ननु प्रकाशा तरदृश्यत्वाभावेऽपि स्वरूपप्रकाशदृश्य एव किं न स्याद्यथा सवित घटादि प्रकाशयन्स्व त्मानमपि प्रकाशयत्येव तथा त्मापि दृश्यमवभासय स्वात्मानमपि भासयेदिति चेन्नेत्याह

क्ति दप्रकाशस्य प्रकाश त्मसमागमात्
का स्त्वर्ककार्यं स्य दिति मिथ्या वचो त ४३

व्यक्ति ादिति अप्रकाशस्वरूपत. प्रकाशहीनस्य प्रकाशा मसमागमात्प्रकाशस्वभावससर्गमात्राद्व्यक्तिरभिव्यक्तिस्तमोनिवृत्तिलक्ष. ण स्यत् न तत्र प्रकाशगुणोदय इत्यथः अत प्रक शोऽर्ककार्य इति मृषा व्यपदेश प्रकाशावगुण्ठिते वस्तुनि प्रकाशोदयाभावेऽभि

व्यक्त्यभावादर्शन दित्यर्थ तस्माद्भासमान रूपससर्ग एव भासस्याभिव्यक्तिरिति प्रकाशस्वभावस्य सवितुर्नान्यप्रकाश्यता स्वप्रकाश्यता वास्तीति न दृष्टान्तत्वसिद्धिरतो न दार्ष्टान्तिकसिद्धिस्त्वत्पक्ष इति भाव ४३

घटादिप्रकाश कस्मादर्ककार्यो न भवतीति चेत्तत्राह

तोऽभूत्व भवे तस्य तत्कार्यमि यते
रूपत्वादभू ा क ो ज य े रवे ४

तोऽभूत्वेति यत्तु प्रागभूत्वा यतो भवेत्तत्तस्य कार्यमिष्यत इति सब ध. स्पष्टमन्यत् ४

कथ तर्हि प्रकाशस्वरूपस्यादित्यस्य प्रकाशयितृत्वमात्मनश्च बोधम त्रस्वभ वस्य बो ृत्वं व्यपदिश्यते तत्राह

ामात्रे काश कर्तादित्यादिरि यते
घटादि क्तितो यद्वत्तद्बोधात्मनी य म् ४५

त्तामात्र इति प्रकाशस्य संधिसत्त म त्रे सति घटादि यक्तितो घटाद्यभिव्यक्तेर्दर्शनादादित्य दि प्रकाशस्य कर्ते यते यद्वत्तद्बोधरूपेऽ यात्मनि स्वाध्यस्तवस्तुसंधिसत्ताम त्रे सति बोद्धृत्वमि यता म ीक्रियतामिति योजना ५

स्वगतविकारम तरेणै वात्मनोऽर्थप्रकाशकत्व मित्येतदपि रविदृष्टान्तेन स्पष्टयति

बिलात्सपस्य नियाणे सूर्यो द्वत्प्रकाशक
यत्नेन विना तद्वज्ज्ञा त्मा बोधरूप ४६

बिल दिति सर्पस्य बिलद्वारान्निर्गमे ज्ञायमाने यद्वत्सूर्यप्रयत्नेन विना पूर्वसिद्धेनैव स्वज्योतिषा तं भासय प्रकाशको व्यपदि

श्यते तद्वदात्मा बोधरूपत्वात्प्रयत्नेन विना विकारम तरेण ज्ञाता यपदिश्यत इत्यर्थः ६

इदानामुपाधिभावे ज्ञातृत्वव्यपदेश त्तदभावे तदभ वादौपाधिकमेव ज्ञातृत्वमिति दर्शयितुं परमुदाहरणमाह

द धै त्ताया तद्वद्बोद्ध त्मनी यताम्
त्ये यदुपाधौ तु ज्ञ ते पे इवोत्थिते ४

द धैवमिति यथा द ह्यसंनिधावु ष्णस्वरूपस्य ग्नेः सत्तामात्रेण दाहकत्वं तथा बोधस्वरूपस्य प्यात्मनो बो ''यसंनिधिमात्रेण बोद्धत्वमि ष्यत ं यद्यस्मादुप धौ ज्ञ ते सत्येवात्मा ज्ञातोच्यते यथा बिलादुत्थिते सर्पे उपाधौ ज्ञाते सत्येव सविता प्रक शकः कथ्यते न तदभावे तस्स दौपचारिक एवात्मनो ज्ञातृत्व यपदेश इत्यर्थ ७

औपाधिकत्व ज्ञातृत्वमात्मनो रविदृष्ट तेन प्रतिप द्य तेनैव दृष्टा तेन कर्तृत्वमप्यौ पाधिकं प्रतिपादयति

ज्ञ ऽय ोपि तद्वज्ज्ञ कता भ्र मकवद्भवेत्
रूपे य नात्मा ज्ञेयोऽ योऽथवा त ४८

ज्ञा ति यद्वदयं ज्ञ आत्मा यत्नरहितोऽपि ज्ञात याख्य तस्त द्वत्स्वगतविशेषशू योऽपि संनिधिम त्रेण कारकाणि प्रवर्तयन्क्रियाण कर्तेति व्यपदिश्यते भ्रामकवदित्यर्थः भ्र मयति प्रवर्तयति प्राक्सुप्त जनसमूहमिति भ्रामक सूर्यः यद्वा भ्र मकोऽयस्कान्त स यथ स्वयं च नादिव्यापाररहितोऽपि लोहकीलादीनां चा को ह स्तथाय मपीत्यर्थः देव व्यक्ति स्यादप्रकाशस्येत्य रभ्योक्त प्र सङ्गि कमा त्मनो ज्ञातृत्व कर्तृ व चौपाधिक व्यवस्थाप्य प्रक्र तमा मनो ज्ञान मेत्वा मेत्वाभ्यामज्ञेयज्ञेयत्वपक्षद्वयसमर्थनमुपसहरति स्वरूपेणेति

यतोऽयमात्मानिर्विशेष. स्वभावतो लुप्तप्रकाशस्वरूपश्च तत स्वय स्वरूपेणासाधारणस्वभावेन न ज्ञेयो ज्ञानक्रियय य स्तो न भवात तथा नाज्ञेयो यवहितवस्तुवन्न ज्ञानप्रकाशरहित इत्यर्थ. अथवे त्यनेन ज्ञाता वान्यस्याज्ञाता वा न भवत्यात्मा निर्विकारत्वाच्चै य योगाच्च तथा कर्ता कारकाध्यास धिष्ठानत्वान्न कर्ता च नि र्यापार त्वादित्यादिविरुद्धप्रतिभासव्यवस्थोपसंहार उक्तो वेदितव्य ४८

आत्मन उक्ते ज्ञयत्वाद्यभावे प्रमाणमाह

विदि ाविदित भ्य ा तद यदेवेति नात्
ब धमोक्षादयो भावास्तद्वदात्मनि कल्पि ा ४९

विदिताविदि ाभ्या तदिति अ यदेव तद्विदित दथो अविदितादधी ति श्रुत्या विदिताविदिताभ्यां कार्यकारणाभ्याम यदा मत्त्व ब्रह्मेति श सनात्कार्यकारणधर्मविलक्षणस्वभाव एवायमात्मेत्यर्थ तथाच यथात्मनि ज्ञातृत्व कारणत्वमित्यादि सर्वमविद्यावशादेव कल्पि तथा ब धो मोक्षश्छिन्नो भिन्नः सुखीत्यादयोऽपि भ वा आत्मनि कल्पिता एवेत्याह ब धेति ४९

ब धादीनामात्मनि कल्पितत्वे सदृष्टान्तं हेतुमाह

ाहोर त्रे यथा सूर्ये भ रूपाविशेष
बोधरूपाविशेषान्न बोध बोधे थ त्मनि ५

नाहोरात्र इति अबोधनिब धनो ब धो बोधनिबन्धनो मोक्ष योरभावे त्र तयोरप्यभाव इत्यर्थः ५

उक्तेनोपायेनोक्तस्वरूपं ब्र विजानत फलमाह

यथो यो वेद हानो ादानवर्जि म्
यथोक्तेन विधानेन त्य नैव जाय ५१

यथोक्तमिति ह नोपादानवर्जितमिति हानोपादानकर्तृत्वं कर्मत्व च यावर्त्यते अनेन सर्वविशेषाः प्रतिषिद्धा भवन्ति परिग्रहपरित्या गात्मकत्वात्सर्वविशेषाण मित्यर्थः यथोक्तविधानं पदार्थपरिशोधन प्रकार स नैव जायत इति सत्यमिति संबन्धः न स भूयोऽभि जायत इति स्मृतेरित्यर्थः ५१

यथोक्तब्र वेदनेन विनापि यथोक्तफलसिद्धे. कृतं ज्ञानेनेत्याशङ्क्य नान्य' प था विद्यतेऽयनाये ति श्रुतिविरोधा मैवमित्य ह

ज ममृत्युप्रवाहेपु पतितो नैव श ुय त्
इत उद्ध म त्मान न द येन केनचित् ५२

ज मेति इत एभ्यो ज ममृत्युप्रवाहेभ्यः केनचित्साधन त रेण ५२

उक्तेर्थेऽथर्वोपनिषद्वाक्य प्रमाणयति

भिद्य हृदयग्रन्थिच्छिद्य ते सर्वसशया
क्षीय ते चा कर्माणि तस्मि द इति श्रुते ५३

भिद्यत इति स्पष्टम् ५३

प्रकरणार्थं संक्षिप्योपसंहरति

मम हमित्येतदपो सर्वतो विमुक्तदेह पदम
रोपमम् सुद शास्त्रानुमितिभ्य ईरित वि य
ऽस्मिन दि निश्चि ो नर ५४

म ाहमिति सर्वतः सर्वात्मना ममाहमित्येतत्सविषयमपोह्य त्यक्त्व नरो मनुष्योऽसि यदि निश्चितो निश्चितमति. स्यात्तदा स विमुच्यत इति योजना अस्मि कस्मिन् विनिश्चित इति तदाह—विमु क्तदेहमिति देहद्वयसंब धशून्यं प्रत्यक्तत्त्वं पदं ब्रह्माम्बरोपम निर

तिशयं नि प्रप मितियावत् कुत एवंविध त्मस्वरूपमित्यपे
क्षयां श्रुतियुक्तिभ्य निर्धारितत्व दत्र संभावना नास्तीत्यभिप्रेत्य
तद्विशिनष्टि सुदृष्टेत्यादि ईरितमित्य तेन यदेवविधं सम्यग्वि
चारितशास्त्रानुम नेभ्योऽस्म भिरीरितमस्मिन्निति संबन्ध ५

ति पञ्चदश न यदन्यत्प्रकरणम् १५

पार्थि रणम् १६

पूर्वस्मिन्प्रकरणे एकदेशिमतप्रतिक्षेपमुखेन ब्रह्मैकत्वज्ञानमेव स्वरू
पावस्थानलक्षणमोक्षसाधनं न भेद भेदज्ञानमिति प्रतिप दितम्
अधुना सर्वत किकमतप्रतिषेधेन मुमुक्षुं स्वाराज्येऽभिषेक्तुं प्रकरणान्त
रमारभमाणः प्रथमं स्थूलशरीरात्मवादिमतं निर करोति

पा र्थिव कठिनो ध द्रवो देहे स्मृतोऽम्म
च्छिद्रे वका स्युर्वह्निव व रोद्भवा १

प र्थिव इति यः स्थूलदेहे कठिनो धातुर्मांसादिरूप स पा
र्थिव. पृथिव्यंश' पृथिवापरिणामात्मक. स्मृतो ज्ञातो विद्वद्भिरित्यर्थ
एव द्रवोऽम्मयोऽपां परिणामः पक्ति पाकश्चेष्टास्प दनमवकाशोन्न
प नमनसां संचारमार्गा देहगतसुषयो ये स्यु एते क्रमेण वह्निवा
य्वम्बरोद्भवा देहानुगतव याद्यशकार्यभूत : स्मृत इत्यक्षरार्थ देहो
नात्मा भूतपरिणामत्वाद्वल्मीकादिवदिति भाव १

इन्द्रियात्मवादिन प्रत्याह

घ्राणादीनि द । थि ादिगुणा त्
रूप लोक दि हि तीय मि न्द्रियम् २

घ्राणादीनीति घ्राणादीनीन्द्रियाणि तदर्थास्तेषां विषया. गन्धादयश्च क्रमात्पृथिव्यादीनां गुणाः कार्याणीत्यर्थ ग धरसरूप स्पर्शशब्द स्तावत्पृथिव्यप्तेजोवाय्वाकाशानां क्रमेण धर्मा. प्रसिद्धास्तेषां घ्राणाद्यैकैकेन्द्रियग्राह्यतान्वयव्यतिरेकसिद्धा तथ च यदिन्द्रियं यस्य धर्मं ग्राहयति तदिन्द्रियं तस्य सज तीय भवितुमर्हति यथा तैजसस्य रूपस्य प्रकाशको दीपादिस्तैजसो दृष्टस्तथेन्द्रिय यपि भौतिकानां प्रकाशकत्वाद्भौतिका येवेत्यनुमानम ह रूपालोकवदिति एवमि न्द्रियाणां भौतिकत्वे सिद्धे देहवदेषाम यनात्मत्वमिति भ व' २

किंचेन्द्रिय णि नात्मन. करणत्वात्कुठारवदित्यनुमानान्तर सूच य कार्यवशाद्रिन्दियाणामेकादशत्वनियममाह

बुद्ध्यर्थान्याहुरेतानि ाक्पा यादीनि कमणे
तद्विकल्प र्थम स्य मन एकादश भवेत् ३

बुद्ध्यर्थानीति एतानि घ्र णादीनि बुद्ध्यर्थानि ज्ञानकरण याहुः वाक्पाणिपादपायूपस्थाख्यानीन्द्रियाणि कर्मणे कर्मर्थे वचनादान गमनविसर्गान दार्थे तत्करणा याहुरित्यर्थः तेषां दशानामिन्द्रि याणां विकल्पार्थं युगपद्विषयसंनिधाने क्रमेण तत्तद्विषयज्ञानादिनि यमार्थे यदिन्द्रिय त मन उक्तदशापेक्षया एकादश भवेत् मनश्चैक साधारणं करणमवश्यमङ्गीक र्थम् अ यथात्मनो युगपदनेकेन्द्रिय विषयसंप्रयोगे सति युगपदेवानेकज्ञान नि जायेरन् नचैवमस्ति तथाच तस्यापि मनसः करणत्वादनात्मत्वमिन्द्रियवदिति सिद्धम् ३

बुद्धिरपि न त्मा करणविशेषत्वान्मनोवदिति बौद्धमत निरा कुर्वंस्तस्या' स्वभावं दर्शयति

नि याथा भवेद्बुद्धिस्ता व थ भाविनीम्
ज्ञाता तोक्त रूपेण ज्योति य द

निश्चयार्थेति । निश्चयोऽर्थपरिच्छेद. सोऽर्थः प्रयोजनं यस्या अन्तःकरणवृत्तेः सा निश्चयाथा बुद्धिर्भवेत् निश्चयकरणं बुद्धिरि र्थ अ यदृश्यत्वादपि तस्य अनात्मत्वमित्याह तामिति बुद्धिज्ञातुरपि बुद्धिवद् यज्ञेयत्वशङ्कां वारयति स्वरूपेण ज्योति षेति तथाच भास्यभासकयो रूपालोकयोरिव भेदाद्भास्याया बुद्धे रन्यो भासक आत्मेत्यथ. ४

यदि बुद्धेरात्मा भासकस्तर्हि तया ससर्गादशुद्धिरापद्येतेत्याशङ्क्य न्तेन परिहरन्नाह

कस्तु य लोको यस्याकार । गत
व्यति ीर्णोऽ यसकी द्वज्ज त्यै दा ५

व्य स्ति ति यथाआलोको व्य को दीपालोकादिर्व्यङ्ग्यस्य घटादेराकारतां गत स व्यतिकीर्णोऽपि व्यामिश्रतया भ समानोऽपि वस्तुतोऽसंकीर्णो विविक्तस्वभाव एव भवति तद्वदेव ज्ञ आत्मा सदाप्र यैर्बुद्धिवृत्तिभिरित्यर्थ अतो नित्यशुद्ध एवात्मेति भ व ५

यदि बुध्य देरत्य तविलक्षणो नि र्यापार आत्मा कथ तर्हि तस्य तदवभासकत्वमित्याशङ्क्य तदपि दृष्टान्तेनाह

स्ति तो दीपो यथाय र्वं क येत्
द ाकारबुद्धीर्ज ासा द्वत्पर ति ६

स्ति त इति स्पष्टार्थः ६

तथापि कथ शुद्धि' सुखित्व दिस्फुरणादित्याशङ्क्य ह

रीरेन्द्रियसघ आ त्वेन ग । धि म्
नित्यात्म योति षा दी । र्वि षन्ति सु ादय ७

शरीरेति सुखादय शरीरादिसंघाते आत्मत्वेन प्रवृत्तं धिय बुद्धिं विशिंषन्ति नत्वात्मानम् किंलक्षणम् नित्यात्मज्योतिष दीप्त प्रकाशिताम् तथाच भास्यभासकबुद्ध्यात्मनोरविवेकादात्म सुखादि मानिति भ्रान्तिरित्यर्थ.

कुत एव निश्चय इत्यत आह

शिरो दिनात्म न दु ख्यस्मीति हि पश्यति
द्रष्टा यो ु खिनो दृश्याद्द्रष्टृत्वाच्च न ख्यसौ ८

शिर इति शिरआदिदेहावयवगतेन दुःखेन हि यस्माद्दुःख्य हमस्मीत्यात्मानं पश्यति तस्य देहमात्मत्वेन गता बुद्धिरिति योजना अयमाशय आत्मनो विशेषविज्ञ न बुद्ध्याध्यासनिब धनमिति हि स्थितिः तथाच शिरोदुःखेनोदरदुःखेन वा दुःख्यहमस्मीत्यभिमा नात्मकबुद्ध्यवस्थापन्नविशेषस्यैव दुःखित्वात्सुखदुःखाद्यो बुद्धिं विशिं ष तीति युक्तं वक्तुमिति द्रष्टा तु दुःखिनो दृश्याद य आत्मत्वे नाभिम यमानदेहावयवोपघातादिजनितदुःखाकारसाभासबुद्धेर्द्रष्टा या. साक्षी तदन्य एवासौ द्र ृत्व देव न दुःखीत्यर्थः ८

द्रष्टृत्व दसौ न दुःखीत्युक्तमेव स्पष्टयति

दु खी दु ख्यहमानाद्दु खिनो दर्शना व
संहतेऽङ्ग दिभिर्द्र । दु खी दु ख नैव स ९

दु ी ादिति अयमात्मा दुःख्यहमानाद्दुःखाकारपरिणाम त्यन्त करणेऽहमित्यभिमानाद्दुःखी स्यान्नतु दुःखिनो दुःखाकारपरि णामवतोऽदर्शनात् तथास युदासीनानामपि दुःखिन पश्यतां दुःखि त्वप्रसङ्ग इत्यर्थ प्र ते किमायातं तदाह संहत इति अङ्गादि

भिर्हस्ताद्यङ्गैश्चक्षुरादीन्द्रियैश्च संहते देहे यद्दुःखं तस्य दुःखस्य द्रष्टा य आत्मा साक्षी स नैव दुःखीति सिद्धमिति शेषः ९

दुःखिनो द्रष्टृत्वेऽपि दुःखित्वमात्मनो युज्यत इति दृष्टान्तेन शङ्कते

च वत्कर्मकर्तृ ाने मेव तत्
द्द च ोन द्रष्टर त्कम प्रजेत् १

चक्षुर्वदिति यथा चक्षुषो दर्पणादिनिष्ठतया दृश्यत्वं तस्यैव स्वदेशस्थतया द्रष्टृत्वं च तथा मनो दुःखसंभिन्नतया दृश्यत्वं स्वरूपचैत यावस्थतया द्रष्टृत्वं चेति कर्मकर्तृत्वं घटत इत्यर्थः सिद्धान्ती परिहरति नेति कुत इत्यत आह अनेकमेव तदिति तच्चक्षुरनेकमनेकाकारमेव संहतं च भवतीत्यतो घटते तस्य कर्मत्वं कर्तृत्वं चांशभेदोपपत्तेरित्यक्षरार्थः गोलकांशस्य दर्पणस्थस्य दृश्यत्वं तस्यैव शक्तिमत्त्वांशस्य मुखनिविष्टस्य द्रष्टृत्वमिति युक्तमुभयरूपत्वमिति विवक्षितोऽर्थः आत्मनस्तु नैवमंशभेदोऽस्ति एकरूपत्वाद संहतत्वाच्चेत्यभिप्रेत्याह तत इति चित्प्रकाशैकस्वभावो ह्यात्मा द्रष्टैव न दृश्यांशसभिन्नो दृश्यांशस्यानात्मत्वादतो द्रष्टृत्वात्कर्मत्वं न प्राप्नोतीत्यर्थः १०

नन्वात्मनोऽपि ज्ञानादिभिरनेकात्मत्वसंभवाच्चक्षुर्वद्द्वास्यभासकत्वं स्यादित्याशङ्क्य प्रत्याह

नेक मात्म ोऽपि मत यदि
नै ान णत्व ज्योति स मे १

न दिति ज्ञानप्रयत्नेच्छाद्वेषादिगुणभेदैरनेकात्मकत्वादात्मनोऽपि केनचिदंशेन विशिष्टस्य ग्राह्यत्वमंशान्तरेण ग्राहकत्वं च

यदि मतमिति शङ्काग्र थार्थ. तुश द शङ्कानिषेध र्थ. मैवम् एकज्ञानगुणत्व त् 'कृत्स्न' प्रज्ञानघन एवे ति श्रुत्या ज्ञानैकस्वभावत्वाव धारणादनेक त्मत्वायोग ज्योतिवत्तस्य न कर्मता ग्राह्यता तस्य न सभवतीति परिह रग्र थार्थ. ११

दृष्ट तं याचष्टे

ज्योतिषो ोतकत्वेऽपि यद्व त्मप्रकाशनम्
भेदेऽ येव समत्वाज्ज्ञ आत्मान नैव पश्यति १२

ज्योतिष इति अयमर्थः यद्य त्मनो ग्राह्यग्र हकांशभेदोऽभ्युपगम्यते तदेदं वक्तव्यं ग्राह्य शोऽपि चेतन किं वा जड इति तत्राद्यं निराकरोति दृष्टा तेन· ज्योतिष इति आदित्यादिज्योतिषो द्योतकत्वेऽपि प्रकाशनस्वभावत्वेऽपि नात्मप्रकाशनं न ज्योतिस्वरूपप्रकाशन तद्वदेवं यथा दृष्टा तस्तथा भेदेऽप्यशभेदकल्पनेऽपि ज्ञ आत्मा समत्वाच्चैतन्यस्वभावाविशेषादात्मान नैव पश्यति न स्वांशं विषयीकरोतीत्यर्थः न द्वितीय. जडाजडयोरंशांशित्वेनाभेदानुपपत्तेर्न ग्राह्यांशस्य त्मत्वमिति नात्मन. स्ववेद्यत्वसिद्धिरिति दूषण स्फुटमेवेत्युपेक्षितमिति द्रष्टव्यम् १२

स्वरूपेणांशद्वारेण वा यद्यप्यात्मात्मानं नैव पश्यति तथापि गुण ज्ञानस्य कर्मत्वं गमि यतीत्य शङ्क्याह

यद्धम य पदार्थो न तस्यैवे त्स कमताम्
न त्मान दहत्यग्नि था नैव क शयेत् १३

द्धर्मेति य· पदार्थो यद्धर्मा येनासाधारणधर्मेण धर्मवान्स तस्यैव धर्मस्य कर्मतां नेयात् तथाच ज्ञानस्वभाव आत्मा न ज्ञानक

मेतां ग तुमर्हतीत्यर्थ　दृष्टान्तभ ग　स्पष्टार्थ　अ त्म न स्वीय धर्मव्या य· पदार्थत्वादग्निवदित्यर्थ　· १३

उक्तन्यायेन विज्ञानवादी बौद्धोऽपि निराकृत इत्य ह

ए नैवात्मना ानो हो द्धेर्निर
अंशोऽ ये म ाद्धि निर्भेदत्वान्न　१४

ए नैवे　आत्मन इत्यस्मिन्न त्म न इति छान्दसः प्रयोगः बुद्धेरात्मनः स्वरूपस्यात्मन स्वेनैव ग्रह इति बौद्धपक्षोऽप्येतेनैवोक्त दृष्टा तप्रबन्धेन निर कृत इत्यर्थः स्वरूपस्य स्वरूपे व ग्राह्यत्वाभावेऽपि एकेनांशेन ग्राह्यत्वमंशा तरेण ग्राहकत्वमिति कल्पनाप्यत्र न घटत इत्याह अंशोऽप्येवमिति एवं प्रागुक्तवर्त्मन तदेवाह समत्वाद्धि निर्भेदत्व दिति　१

एवं बुद्धे　ग्राह्यत्वनिराकरणेनार्थादन्यग्रा त्वमुपक्षिप्तमन्यथा तस्याः क्षणिकत्वाद्यसिद्धे　तत्र माभूत्तर्हि बुद्धिस्तद्ग्राहकश्च पर शू यमेवात्मतत्त्वमस्त्विति वादिन निराकरोति

शून्य ापि युक्त　र　दृश्य
ो घटव　क्सिद्धे वि　१५

शून्य पीति　एवसति शून्यत पि न युक्ता यद्वा यथा बुद्धे स्वग्रा ता न युक्ता युक्तिविरोधादेव शून्यतापि बुद्धेस्तदवभासस्य च न युक्ता अपरोक्षतया तस्या प्रतीयमानत्वादित्यर्थ अतो हेतोर्घटवदन्येन साक्षिण बुद्धेर्ग्राह्यत क्ता स क्षिणि पर्यवसानात्तस्यापि न शून्यताशङ्केत्यर्थ किंच तस्या द्धेर्वि तो विकल्पनात्प्रागेव तत्साक्षिण सिद्धेर्न शून्यता द पी र्थ द्धिवि पनात्पूर्वमेव

सुषुप्त व यात्मप्रकाशसद्भावोऽङ्गीकर्तव्योऽ यथा सुषुप्तेरसाक्षिकत्वादव स्था तरे परामर्षानुदयप्रसङ्गादिति भावः   १५

किंच यत्क र्यं यदन्वित दृश्यते तत्तस्य कारणं कार्यविकल्पात्प्राक् सिद्ध च यथा घटान्विता मृत्तथा बुद्ध्य दे र्विकल्पस्य सदार्थान्वितत योपलभ्यमानत्वात्प्राक् सिद्धसत्कारणकत्वमेव युक्तमित्याह

अविकल्प दस्त्येव यत्पूर्वं स्याद्विकल्पत
विकल्पोत्पत्तिहे त्वा द्यस्यैव तु क रणम्   १६

अविकल्पमिति सर्वविकल्परहितं कूटस्थमित्यर्थः अकार णकार्योत्पत्तेरनुपपत्ते कारणसत्त्वमेष्ट यम यथा कार्यविशेषार्थिन' कारणविशेषोप दानप्रवृत्तिनियमानुपपत्ति' शून्यस्य सर्वत्र सुलभत्वा दिति भाव   १६

कूटस्थस्य ब्रह्मात्मनः कथ कारणत्वं यापारवद्धि कारण नामेत्या शङ्क्य रज्जुव सर्पस्य विवर्ताधिष्ठानतया तस्य कारणत्वं घटत इत्यभि प्रेत्य ह

अज्ञान कल्पनामूल ससारस्य नियामकम्
हित्वात्मान पर वि द्या त्क सदाभयम्   १७

' अज्ञानमिति अज्ञ नमनाद्यविद्याकूटस्थप्रत्यगात्मनि ब्रह्मणि सर्वकल्प । या मूलमतद्रूपप्रतिभासहेतुरित्यर्थ तथाच चिदविद्यावि वर्तेषु कार्येषु सत्तात्मना भासमानतया कारणत्वं कूटस्थस्यापि घटत इति भाव. ससारस्य नियामकमिति विशेषणेन सर्वविकल्पनाया अज्ञानमूलत्वेऽ वय यतिरेकाख्य प्रम णमनुमान सूचयति तर्ह्यज्ञ न विशिष्टमेव , किं ब्रह्म प्रत्यक्त्वेनानुसंधेय नेत्य ह हित्वेति सकार्यमज्ञान हित्व साक्ष्यत्वेन तस्य साक्षिधमत' बाधित्वात्मान

प्रत्य स क्षित्वेनोवरित साक्ष्यबाधया पर परिपूर्णं मुक्त कार्य
ारणप्रपञ्चससर्गरहितमभयमद्वयमह ब्र ास्मीति महावाक्यार्थभूत
सदा वि द्यादनुसदृध्यादित्यर्थ १७

संसारनियामकमज्ञान हित्वात्मान ब्रह्म वि द्यादित्यु तत्र क.
ससार. कथ व तस्याज्ञान कारण ततो वा कथमात्मनो विवेक
स्यादित्यपेक्षायामाह

ज ग्रत्स्वप्न ोर्बीज सुषुप्ताख्य मोम म्
अ योन्यस्मि सत्त्वा ना ास्त्येतत्रय त्यजेत् ८

ाग्रदिति जाग्रत्स्वप्नौ स्थूलसूक्ष्मविषयभोगलक्षणौ संसार
इति शेष तयोर्बीजं कारण तमोमयमज्ञानप्र य सुषुप्ताख्य सुषु
प्तिसंज्ञितम् तमोबीजमिति वक्त ये मयट्प्रयोगादज्ञानस्य स्वात य
वार्यते साभास तमोबीजमित्यर्थ एवं कार्यकारणस्वरूपमुक्त्व
तयोस्त्यागप्रकारमाह अन्यो यस्मिन्निति स्थूलसूक्ष्मकारणावस्था
नाम योन्यस्मिन्नस ात्सत्त्व यभिचाराच्चकारा श्यत्वा एतत्त्रयं रज्ज्वां
द्व सर्पधारादिवदात्मनि ततोऽ यत्र च नास्तीति ज्ञ त्वा त्यजेद्विलाप
येत् आत्म न शोधयेदित्यर्थ १८

त्यजेदित्युक्ते कर्तृत्वप्रतीते थमस्य त्मनो ब्रह्मत्वमित्यत आह

आत्म द्धिमनश्चक्षुर लोकार्थादि कर त्
ान्ति स्यादात्कर्मेति क्रि या ासनिपातत १९

अ बुद्धीति आत्म देह अर्थादीत्यादिपदाद्देशकाल दिग्रह
आत्मादीन संकरान्मिथो गुणप्रधानभावेनाध्यासाद्धेतो क्रियाणां
सनिपातत समुद्भवादात्मकर्म अ त्मन कम क्रिया इत्य त्मा तदाधिष्ठान

भूत. कूटस्थोऽपि करोतीति भ्रान्तिः स्यात् तस्मादात्मन' स्वतो निष्क्रियत्वान्निष्क्रियं ब्र त्वमविरुद्धमित्यर्थ' १९

अन्यधर्मस्याप्य यत्रारोपे दृष्टा तमाह

नि ी ेमी े ने ायये े च
त्वा मनस्येव द्धै न शत २

नि ीलेति ये नेत्रगोलकस्थ ने निमीलोन्मीलने दृष्टे ते वायव्ये वायुकार्ये क्रियात्मकस्य वायोस्तदाश्रयत्वान्न चक्षुरिन्द्रियस्य तस्य प्रकाशरूपत्वात्क्रियाश्रयत्व नुपपत्तेस्तथ पि चक्षु येव ते यपदि श्येते अध्यास यथा एव मनसि बुद्धौ च चलनाचलने न स्त प्रकाशत्वादेव स्वतो न विद्येते तथापि प्राण यापाररूपे ते तयोरा रोप्येते च लं मन स्थिराबुद्धिरिति व्यपदेशदर्शनादित्यर्थ' २

मनोबुद्ध्योरसाध रणधर्मकथनपूर्वक प्रासङ्गिकमुपपादितमुप संहरति

स ल ाध ौ म ोबु ोर्यथ क्रमात्
ने रे रधमत्व चात्मनि कल्पि म् २१

ल्पेति सकल्पधर्मकं मनोऽध्यवसायधर्मिका बुद्धिरिति वस्थैव न सांकर्यमित्यर्थ तस्मात्कूटस्थस्यात्मन स्वत'कर्तृत्वा सभवादविद्यादेश्च जडस्य स्वातन्त्र्येण प्रवृत्त्यसंभ ाज्जडाजडयोश्च परमाथत संबन्धानिरूपणात्सर्वं सहेतुक ससारबन्धनम त्मनि ल्पितमध्यस्त न परम र्थत इति सदैव त्म द्वय ब्र ेति सिद्ध मित्यर्थ २१

पूर्वं देहेन्द्रियमनोबुद्धिशून्यात्मवादनिराकरणेन तद्विलक्षण आत्मा विवेचित इदानीं देहादिविलक्षणोऽ य त्मा देहसमपरिमाण इति

जैनमतेन त्मन. परिच्छिन्नत्वशङ्कायां न तस्य ब्रह्मत्व पपद्यते नच तत्र सर्वं कल्पितमिति युज्यते कल्पकाभावादित्याशङ्क्याह

ाना छेददृष्टि स्य दिन्द्रि । ।तदा ाम्
ग । धी । हि पश ञ्ज्ञो देहमात्र इवेक्ष ते २२

ानेति इन्द्रियाणां देह द्बहिर्वृत्त्यभावाद्देहावयवगोलकस्था न वच्छेदेन दृष्टिरुपल भः स्यात् भवतात्यर्थे स्याच्छब्दः तथाच त्वगादीनामिन्द्रिय णां यथायोगं देहपरिमाणत्वात्तदात्मतां गता धीः सेन्द्रियदेहतादात्म्यं प्राप्ता बुद्धिः स्यादिति योजना तां बुद्धिं पश्यन्न वभासयन् ज्ञ आत्मा स्वतोऽपरिच्छिन्नोऽपि देहमात्र इव देहपरिमाणाव च्छिन्न इवेक्ष्यते ज्ञायते भ्रा त्या प्रतिभासते अ यथा मध्यमपरिमाणस्य घटादिवत्सावयवत्वेन नित्यत्व पत्तेः पारलौकिकसाधनप्रवृत्त्यसभव प्रसङ्ग इति दिक् उक्तोपाधिम तरेणात्मनः स्वतःपरिच्छेदानुपल भाद्युक्तं तस्य ब्रह्मत्वम् निरवयवस्य च परमार्थत उप.धिसंसर्गयोगा द्युक्तं तस्मि सर्वस्य कल्पितत्वं चेति भ वः २२

दिग बरमतनिराकरणेन यदन तत्वमात्मन उक्तं तदमृष्यमाणाः शाक्याः प्रत्यवतिष्ठन्ते

क्षणिक हि दत्यर्थ ध ात्र निर रम्
स दृश्य द्दीपव द्धीस्त न्ति पुरुष र्थत २३

क्षणि हीति तज्ज्ञानं ज्ञेय चेत्युभय क्षणिकं हि निश्चितम् कतिपयानेकक्षणव र्तित्वशङ्कां वारयति अत्यर्थमिति स्वरसभङ्गुर मित्यर्थः धर्मम त्र वस्तुमात्र न स्थायि किंचित्तस्याधिष्ठानमस्तीति मात्रस्य र्थः तर्हि कथ विच्छेदो नोपलभ्यते तत्र ह निरन्तर मिति नैर तर्येणोत्पद्यमानमित्यर्थ यदि सर्वं क्षणिकमेव कथं

त हि तदेवेदमिति सोऽहमिति च दृश्यद्रष्टृविषय प्रत्यभिज्ञान घटत इत्याशङ्क्य अतिस न्श्यादित्य ह सादृश्यादिति तद्धीस्तदेवेद मिति मतिस्तच्छ न्तिस्तस्य स्थ यि प्रतिभासस्य ज्ञानज्ञेयगतस्य त मू स्याविवेकस्य च शान्तिरस्तमय प्रतिभासनिवृत्तिरेव पुरुष र्थता मोक्ष इत्यर्थ २३

सिद्धा ता दूषणविभ गज्ञानाय बौद्धमतभेद विविच्य दर्शयति

ाक र ावभास च ेषा रूप दि विद्यते
येषा नास्ति ततश्च त्पूर्वासगतिरु ते २४

स्वा रेरि स्वाकारस्या येन ज्ञानेनावभासोऽस्य स्ताति स्वाका- ाय वभ स रूपादि बा स्तु येषां बौद्धानां मते विद्यते येषां च ज्ञ नमात्रास्तित्ववादिनां मते ततोऽवभासाज्ज्ञ न दन्यद्बाह्यं रूप दि नास्ति पूवार्धगतचकाराद्येषां मते विज्ञ नमपि नास्ति शून्यमेव सर्व मिति तत्र पूर्व संगतिर्बाह्य र्थसत्त्ववादस्यासंगतिरघटमानता त वदु च्यत इति प्रतिजानीत इति योजना २४

त मतस्यासंगतिं प्रतिपादयति

ा ाक रत्वतो ज्ञप्ते स्मृत्यभ व सदा क्षणात्
क्षणिकत्वाच्च सस्क र नैव धत्ते चित्तु धी ५

बा ेति ज्ञप्तेर्ज्ञानस्यैव बाह्याकारत्वतो बाह्यवस्त्वाक रत्वप्रसङ्गा दित्यक्षरार्थ ज्ञेयस्योत्पत्तेः प्राक् तावज्ज्ञानसब धो न स्ति उत्पन्नस्य च स्वरसभङ्गुरत्वात्कर्मकारकतया ज्ञ नात्प्र गवस्थानाभावादज्ञानेन सब धानिरूपण च प्रत्यक्षानुभवविरोधान्नित्यानुमेयत्वकल्पनानुपपत्तेश्च परिशेष ज्ज्ञ नस्यैवाक रो विषय इति विज्ञानमात्रास्तित्ववादिमतप्रवेश इति भ व किंचानुभवितुरपि ते मते क्षणिकत्वादन्यानुभूतेऽन्यस्य

स्मृत्यदर्शनादनुभूतविषयस्त्यभावश्च प्रसज्येतेत्याह स्मृत्यभाव इति क्षणात्क्षणिकत्वात्सदा स्मृत्यभाव प्रसज्येतेत्यथ स्मृतिहेतु सस्कारोऽपि ते दुर्लभ इत्याह क्षणिकत्वादिति धी. क्वचिदपि सस्कार नैवाधत्ते न निक्षिपति सर्वस्य क्षणिकत्वादित्यर्थ चशब्दान्न स्वात्म यपि स्वस्य पि क्षणिकत्व दित्यर्थः २९

क्वचिदित्युक्त स्फुटयति

आध र   स्त्व   त्य निर्निमि
ने क्षणि स्य हान   दिष्यते २६

अ धारस्येति यत्र संस्कार अ धातव्य आत्मन्य तःकरणे तस्याप्याध रस्य संस्कार धानकालेऽसत्त्व च स्मृत्यभाव इत्य य. यदुक्तं स दृश्यनिब धनो भ्रम एव प्रत्यभिज्ञानमिति तद्दूषयति तुल्यतेति इत आरभ्य क्रियमाणं दूषण क्षणिकविज्ञानमात्रवादेऽपि समान ज्ञेयम् तुल्यतानिर्निमित्तत इत्येक पदम् तुल्यत याः पूर्वा परक्षणयो. सदृशत्वस्य निमित्त भ व दित्यर्थ गुणैरवयवैर्वापि साम र्यं सादृश्य यवहारनिमित्त तद्विज्ञान ना न स्ति निर्गुणत्वान्निर वयवत्वा तथा पूर्वोत्तरक्षणयोर्द्रष्टुरेकस्यासत्त्व च न सादृश्यसि द्धि अतस्तुल्यताया असि द्धेन तद्नि ब धन प्रत्यभिज्ञ नमित्यर्थः अथ पूर्वापरक्षणस दृश्यद्र । स्थ यी कश्चिद स्थी ते तत्राह—स्थाने वेति तत्क्षणिकत्वहानं नेष्यते त्वयेति शेष २६

यत्तु क्षणिकत्वादिभावनया स्थायित्वादिभ्रान्ति शान्तिर्मुक्तिरित्युच्य ते बौद्धै दपि नोपपद्यत इत्य ह

न्ते य रि द्धत्व त्स धनोरि र र्थि
ए रि   ास च्छार रन ता   २

। तेश्चेति   श न्तेरयत्नसिद्धत्वमेव साधयति एकैकस्मि न्निति भावानामेकैकस्मि क्षणे समाप्तत्व त्संतानस्य चावस्तुत्वादेकै कस्मिश्च श्रा त्यभावाच्छान्तेर यत्ननिरपेक्षता सिद्धा अतस्तत्साधनविधा नोक्तिानरवकाशेत्यर्थः   २७

किंच सि मते लोकेऽपि साध्यसाधनभावो न घटत इत्याह

अपेक्ष यदि भि ऽपि परसतान इ यत म्
सर्वार्थे क्ष णिके कस्मिंस्तथा य यानपेक्षता   २८

अपेक्षा यदीति   कार्यकारणलक्षणानामत्य तविलक्षणत्वाद्भि न्नेऽप्यत्य त व्यावृत्तेऽपि क्षीरे यदि दध्नोपेक्षा तथा परसंत ने सिक तादावपि दध्नोपेक्षे यतां अत्य तभेदाऽविशेषात्कथ ने यत इत्यर्थ. तथ च सिकताभ्योऽपि दधि जायेतेत्यतिप्रसङ्ग इति भावः प्रसिध्द्य वष्टम्भेनातिप्रसङ्गपरिहारशङ्कां तदीयामनूद्य निराकरोति सर्वार्थे इति सर्वस्य जनस्य र्थेऽर्थ्यमाने कार्यकारणभावेन स्थिते दधिक्षीरादौ वस्तुनि क्षणिकेऽपि कस्मिंश्चित्क्षीर एव कस्यचिद्दध्नोपेक्षा न सर्वत्रेति लोकप्रसिद्धेर्नातिप्रसङ्ग इति चेदिति शङ्क नुवादार्थः तथ पि प्रसि ध्द्याश्रयणेऽपि क्षणिकपक्षेऽ यानपेक्षतैवेति परिहारभागार्थः   २८

तत्र हेतुम ह

तुल्य ाल द्भूतावितरे रयोगिनै
ोग च सस तो यस सोऽ य हीक्षि महति २९

तुल्यकालेति   यौ भावौ तुल्यकालसमुद्भूतावेककालेन लब्धा त्मकौ इतरेतरयोगिनौ परस्पर सबद्धौ च यथा पर्जन्य ङ्कुरौ तयोर्मध्ये यस्तु भावोऽङ्कुरलक्षणः पर्ज ययोग त्सस्कृतश्च ल धातिशयश्च भवेत्स हि खल्व यमुपकारिणमीक्षितुमपेक्षितुमर्हति न क्षणिकस्तथा प्रसिध्द्य

भ वात अत क्षणिकानां भिन्नकालतया परस्परसंब धाभावेनोपका र्योपकारकत्वायोगान्नापेक्षा घटयितुं शक्यत इति भावः २९

तदेव क्षणिकमतं निराकृत्य शून्यमतं निराकरि यन्नादौ स्वमत सामञ्जस्यमुप यस्यति

मृषाध्या स यत्र स्य त्त श नो त
सर्वनाशो भ द्य ोक्ष क फल वद् ३

मृ ति यद्वा वेदा तमतेऽपि ब्रह्मात्मनोऽनाधेय तिशयत्वात्क्ष णिकमत इव तुल्या मोक्षानुपपत्तिरित्याशङ्क्य परमार्थतोऽतिशयायो गेऽपि स्थायित्वात्फलत्वोपपत्तेर्मैवमित्याह मृषेति यत्राधिष्ठाने ब्र त्मनि कर्तृत्वादिसंसाराध्यासो मृषा मिथ्या अथवा मृषाध्या सोऽविद्यानिबन्धनो भ्रमः कर्तृत्वादिसंसारप्र तिभासो यत्र स्यादिति योजना तत्राह ब्र ास्मीति विद्यया तत्रैव तन्नाशोऽध्य नाश इति नो मतोऽस्माकं मतमित्यर्थः तथ च योऽज्ञानाद्ब धानुभवव ंस्तस्य ज्ञानाद्ब धनिवृत्त्या शुद्धस्वरूपानुभवः पुरुषार्थ इति वेदान्तिमत समञ्जसमिति भाव इद नीं शून्यमते दोषमाह सर्वनाश इति अनुभवितुरभावात्कस्य पुरुषार्थः अधि नारोप्ययोरुभयोरपि नाशे फल भाव त्फलासिद्धेर्मोक्षासिद्धिरिति भावः ३

सर्वनाश एव मोक्षो बलाद् पतति परम र्थस्वभावस्यास्तित्वे प्रमा ण भावादित्याशङ्क्याह

असि त्स्वय ज्ञ त्म दे
भ स्य स धिगम्यते ३१

अ ीति स्वय नामास्तीत्य विव द सर्ववादिनाम् स च ज्ञान । अ त्मा वा य छू य वेति पर विकल्पस्तस्याभाव तु न धिग यते

शून्यत तु न प्राम णिकात्यर्थ   कुत इति तत्राह   भावाभ वज्ञत इति   ोकव्यवह रसिद्धार्थाना भावाभाव भिज्ञत्वाद् यथा स्थिरस्य कस्यचित्साक्षिणोऽभावे सर्व यवहार ोपप्रसङ्ग इत्यर्थ   ३

तस्या यभ व कस्यचिद्भातीत्याशङ्क्य यस्य भ ति तस्यैव सत्त्वप्र मेर्न शून्य॰ शङ्कावक श इति रिहरति

ये ाधिगम तेऽभावस्तत्सत्स्या   चेद्भवेत्
भावाभा ानभिज्ञत्व लोकस्य स्यान्न चे ॅ   ३२

येनेति अथवा उक्तमेवार्थं प्रपञ्चयति—येनेति येन भावोऽधि ग यते सर्वस्य तत्सदेव स्यात् विपक्षे दोषमाह तन्न चेदि ादिना अस्तु लो स्य भावाभावानभिज्ञत्वमिति चेन्नेत्याह न चेष्य इति केनापि सोऽभिज्ञो निराकर्तुं न श यते निराकतुरे तत्त्वरूपत्वात्तस्य च सत्त्वात्तस्यापह्नववचन स्वानुभ विरुद्धमेवेत्यर्थ'   ३२

यद्यपि भ वाभाववि ागज्ञं किंचिदस्तीत्यवगत तथापि तत्कादृश मिति विशेषतो निर्धारणे कारण नास्तीत्याशङ्क्य तत्स्वरूपमुपप द यति

दस॰ द चेति वि ॰ ॰ ग्यदिष्यते
दद्वै स त्व त्तु नित्य च यद्विकलि त्   ३३

सदसदिति साक्षिस्वरूप जगच्च सदसद्रूपमिति च यो विक पो विवादस्तस्म त्प्रागेव सिद्धं निराल बनविकल्प नुपपत्तेर्यत्स्व रूपमि यते त्वद्वैतम् तत्र हेतुः समत्वादिति विकल्पात्प्रा वै म्यहेत्वभा ादित्यर्थ   द्वै जडविलक्षणत्व तत्स्वरूपमभिधायाविन शित्व विशेषान्तरमाह नित्य चेति अनृ विलक्षणत्वेन सत्यत्व च विशे न्तरमाह अन्यद्विकल्पितादिति विकल्पात्प्राग्यदिष्यत

इत्यत्र स्वत सिद्धत्वोक्त्या ज्ञानस्वरूपत्वमुक्त अद्वैतमि ानन्त्यमुक्तम् नित्यमिति कूटस्थत्वोक्त्या दु.खाभावस्य सूचितत्वात्तदविनाभूत न न्दरूपता ध निता तथाच सत्यज्ञानान तान दरूपमात्मतत्त्व मित्यनु भ देव सिद्धमिति न तत्र कारण तरं मृ यमिति भाव ३३

नानाविधे द्वैते प्रतीयम ने कथमद्वैतमात्मतत्त्वमनुभूयत इत्यत आह यद्व द्रष्टुः सत्यत्वमुपपाद्य दृश्यस्य विकल्पात्मकतयानृतत्व प्रतिपादयति

वि ल्पोद्भव ाऽ त्त्व दृश् वदिष म्
द्वै स्य ागस त्त्व द त्त्वादि ल्प त् ३४

वि ल्पोद्भव इति द्वैतस्यासत्त्वं परमार्थत्वाभाव इ यताम् कुत विकल्पोद्भवतो विकल्परूपेणोद्भूतत्वात्स्वप्नदृश्यवदिति योजना द्वैतं न परमार्थ सत् दृश्यत्व त्स्वप्नदृश्यवदित्यर्थः हेत्व तरमाह प्रागिति सदसत्त ादिविकल्पन ा ागसत्त्वाच्च स्वप्नदृश्यवदिति सबन्ध नहि द्वैतस्य ज्ञातसत्त्वे प्रमाणमस्तीति भावः ३

य य तो द्वै मि याात्व पपाद्य श स्त्रादपि न्मिथ्यात्व पपन्न मित्याह

ाचार भणशा विक र ा भाव ा
मृत्यो मृत मित्यादे म मायेति च स्मृते ३५

वा ारम्भ ेति वाचार भण विकारो नामधेय इति श्रुति शास्त्राद्विकाराणामभावत सिद्धेति शेषः व च र भणशब्दो ह्यनृत चनोऽवगम्यते मृत्तिकेत्येव स मिति क रणे सत्यत्व वधारण दि त्य मृत्यो स मृत्युमिति शा ेण द्वैतदर्शनस्य निन्दितत्वात्स त्यत्वे द्वै स्य तदयोगादर्थादनृ त्व तस्योक्तमित्यर्थः आदिशब्दात्

नेह नानास्ति किंचनेत्यादिस क्षान्द्वैतापवादकं शास्त्रं गृह्यते म मायेत्यत्र मामेव ये प्रपद्यन्ते मयामेतां तरन्ति ते इति गुणमय्या सकार्याया मायाया॰ परमात्मज्ञाननिवर्त्यत्वस्य भगवतोऽनुशासनात्सत्यत्वे तदनुपपत्तेर्मायिकत्वं द्वैतस्य सिद्धमित्यर्थ ३५

तदेवं श्रुतियुक्तिभ्यां द्वैतमिथ्यात्वप्रतिपादनेनात्मनोऽद्वितीयत्वे न्ढीकृते सत्त्वशुद्धिकारणाभावात्तस्य विशुद्धिरपि सिध्यतीत्याह

विशुद्धिश्च त एव स्य विकल्पाच्च विलक्षण
उपादेयो न हेयोऽत आत्मा न यैरकल्पि ३६

विशुद्धिरि अस्यात्मनो विशुद्धि॰ धर्माधर्मतत्फलसस्पर्शाभाव अतएव द्वैतस्यानृतत्वादेव सच यतो विकल्पाद्विलक्षणस्तद्विपरीतस्वभावोऽतएवात्मा नोपादेयो हेयो वा भ ति हानोपादाने हि मूर्तविषये नामूर्ते प्रत्यगात्मनि ते सभवत इत्यर्थः किंचा यैरकल्पितोऽ यै॰ कल्पयितुमशक्यत्वादपि विशुद्ध एवात्मेत्यर्थ नहि सर्वकल्पनाधिष्ठानं केनचित्कल्पयितुं शक्यते अतो नित्यशुद्ध इति भावः ३६

कस्मादात्मा कल्पितो न भवतीत्याशङ्क्य कल्पनहेतोरज्ञानस्य वस्तुत अ त्म यभावादित्याह—

अ क ो थादित्ये न स्ति ोति स्वभावत
नित्य ोधस्वरू त्वा ज्ञान तद्वद त्मनि ३

अ क श इ ति अनात्मनोऽज्ञ नकल्पितत्वादेव तत्र तदभाव इति द्रष्टव्यम् ३७

यथ नित्यबोधस्वरूपत्व दज्ञानमात्मनि वस्तुतो नास्ति तथा सर्वविक्रियारहितस्वभावत्वादवस्था तर कूटस्थताप्रच्युतिरूपं तस्य नास्तीत्य ह

ाविति यरू ८ ावस्थ रम ८
अवस्थ तरवत्त्वे हि ना ाोऽस्य स्य स य ३८

तथाविक्रियेति विपक्षे दोषमाह अवस्था तरवत्त्वे हीति ३८
मोक्षस्यावस्था तरत्वात्कथमवस्था तराभ व इति तत्राह

मोक्षोऽवस्था तर स्य त स चलो
न योगो वियोगो ा मोक्षो क्त कथचन ३९ ।

मोक्ष इ यस्य वादिनो मते मोक्षोऽवस्थ तरमात्मनः स्यात्तस्य मते तको मोक्षः स्यात्प्र गवस्थायोगि त्वानुपपत्तेः अतः स मोक्षश्चलो ऽनित्य एव स्य दित्यपुरुषार्थतापत्तिरित्यर्थः माभूदवस्था तरं मोक्ष स्तथ पि ब्रह्मणः संयोगो वा प्रकृते र्वियोगो वा मोक्षो भविष्यतीति मत तरमाशङ्क्य प्रत्याह न संयोग इति २९

अयुक्तत्वे हेतुमाह

सयोगस्य नि ८ ाद्वियोगस्य थै च
गमनागमने चै स्वरूप तु न हीयते ४

योगस्येति कृतकस्यानित्यस्य नियमादित्यर्थः ननु जावस्य ससारदेशात्परमात्मनो वा स्वोपासकानुग्रहाय तं प्रत्यागमनं मोक्ष इत्याशङ्क्याह गमनागमने चेति न मोक्षो युक्त इति पूर्वेणा नु ङ्ग जीवपरयोर्द्वयोरप्यविक्रियत्वाद्गमन गमनायोगादित्यर्थः पर मते दोषमुक्त्वा स्वमते निर्दोषतामाह स्वरूपं त्विति न हीयते न विनश्यति अत आत्मस्वरूपमेव मोक्षो युक्त इ र्थः ४

आत्मस्वरूपमोक्षस्य नित्यत्वेऽकार्यत्वे हेतुमाह

रू स्य निमि त्वात्सनिमित्ता हि च रे
अ प रूप हि ेन ८ थै च ४१

स्वरू ेति नास्ति निमित्त ारण यस्य तदनिमित्त तस्य भावोऽनिमित्तत्व तस्मादकार्यत्वादित्यर्थः अपरे अवस्थान्तरादय सनिमित्त हीत्यतोऽनित्या स्युरित्यर्थः स्वरूपस्यानिमित्तत्व तल्लक्ष णोक्त्य साधयति अनुपात्तमिति स्वरूपं हि नाम तद्यत्स्वेनान्येन वा नोपात्त प र्जितं न भवति तथ स्वेनान्येन वा त्यक्तमिति न भवति नह्युपादेय वा वस्त्रादेः स्वरूपत्व दृष्टम् अतो नाग तुक वस्तु स्वरूप किंतु नित्यमेवेत्यर्थः ४१

उक्त स्वरूपलक्षणमात्मनि लक्ष्ये योजयति

स्वरूपत ैस्य कु श यो न्य
ी वा ततो नित्योऽवि य ात थक्त्वत २

रूपत्वादिति सर्वस्याक शादेः स्वरूपत्वादारोपितसर्पादे रज्वादिवत्सर्वस्य त्मभूतत्व त्यक्त गृहीतु वा न शक्य अ त्म कुतः हि यस्य दनन्यतो भेदाभावादित्यर्थः हेयोपादेयत्वाभावे सिद्धे फलितमाह गृहीतुमिति आत्मन उपादानह नयोरयोगे पुनरपि क्रमे हेतुद्वयमाह अविषयत ात्पृथक्त्वत ति नह्यविषय उपादीयते स्वरूप वा त्यज्यत इति युज्यत इत्यथः ४२

आत्मनो नित्यत्वे हेत्वन्तरमाह

आत थत्वा सर्वस्य नित्य आत्मैव केवल
त्यजेत्तस्मात या सर्वां साधनै सह मोक्षवित्। ४३

आत ा ैत ा ेति सर्वस्यागमाप यिन आत्मार्थत्वादात्मभोग्य त्वात्ते वनागमापाय्यभोक्ता मा नित्य एवेति योजना केवलो निरु पाधि रित्यर्थ. उपाधितोऽप्यस्य विशेषो नास्तीत्यर्थ यस्म दात्मा नित्योऽन्यत्स मनित्यमात्मार्थं च स्वा म य स्थान मोक्ष इति

सिद्धम् तस्मान्मु णा ससाधन सर्वं मं त्याज्यमि ह त्यजेदिति ३

इतोऽपि मुमुक्षुणा क्रिय त्याज्येत्याह

आ लाभा रो ला इति स्रोप त्तय
अला गोऽन्य लाभस् त्यजेत्त दना मू ४४

आत्मलाभ इति अ मलाभ पर विद्यत इति स्मृति म् सर्वस्वत्य गेनाप्य त्म रक्षणप्रवृत्तिदर्शनमुपपत्तिः बहुव न प्रयोगादनेकत्व श स्त्रो पत्तीन सूचयति अ त्मल भस्य नित्यसिद्ध त्वात्किमिदमपूर्वमिवोच्यत इत्यत आह अल भ इति अन्यस्मि स्वाज्ञ नपरिनि पन्नेऽह ारादावभेदेन त्मस्फुरण यात्मल भ च्यते स तु भो न भवति संस रदु खहेतुत्वात् स्वतःसिद्धपरमानन्दा विर्भावप्रतिबन्धकत्व त्प्र युत क्षतिरेवेत्यर्थ तस्मादनात्मतामह ारा म भिमानित मविद्य ध्यारोपि प्रमाणजनितब्रह्मात्मज्ञानेन ज्ञान धनद्वारा जेदित्यर्थ ४

आ मतत्त्व ह्मस्वरूपा गम अ त्म ाभ एव परमो लाभ परम पु ष र्थ इत्या मैक्यज्ञान मोक्षसाधनम त्मा चाद्वयानन्दरूपस्तस्मिन्न ज्ञानमूल. ससारो न परमाथत इति स्वमतमभिध य तत्रैव क्षूण मतिस्थैर्याय मत रनिरा रणं कर्तुमारभम णो भगव भा यकार सांख्य ल्पन त वन्निराकरोति

प्रशो

अविद्यादे सुस चान्यो तुरुच्य ४५

गुणानामिति त्र यत्प्रधान त्रिगुणात्मक स्वतन्त्रमच्चेतन

पुरुषस्य भोगापवर्गार्थं महदादिरूपेण परिणमत इति कल्पयन्ति तावन्न संभवति यतो गुणानां सत्त्वरजस्तमसां समभावस्य सृष्टिप्रा ालीनमेलनस्य अंशः प्रच्युतिः पूर्वावस्थात्यागेनावस्थान्तराप त्तिरूप. परिणामो दुर्घटत्वान्नोपपद्यते कुत इतिचेत्तत्र वक्तव्यं किं निर्हेतुक एव गुणपरिणाम इष्यते सहेतुको वा नाद्य सद परिणामप्रसङ्गात् द्वितीयेऽप्यविद्याप्राप्यदृष्टपुरुष एव हेतुस्तद् यो वा परमेश्वरः नाद्य इत्याह अविद्यादेरिति तस्यामवस्थाय म विद्यादेः प्रसुप्तत्वाल्लीनत्वात्पुरुषाणामुदासीनत्वान्न तन्निमित्तः सा य वस्थाभ्रंश इत्यर्थः न द्वितीय इत्याह नचा य इति अविद्या दिभ्योऽ यपरमेश्वराङ्गीकारेऽपसिद्धा तप्रसङ्ग इत्यथ ५

गुणानामन्योन्यं प्रवृत्तिहेतुत्व स्यादिति चेत्तत्राह

इ रे रहेतुत्वे त्ति स्या‹ दा न ।
नियमो न वृत्तीना गु ात्मनि । भवेत् ४६

इतरेतरेति अस्मि पक्षे प्रयोजका तरप्रतीक्षानपेक्षणात्सदा प्रवृत्तिः परिण मः स्य न्न वा स्याद्विशेषाभावादित्यर्थ अथ क्रमेणो त्पत्तिस्थितिसंहाराणां प्रसिद्धत्वान्न सदा तत्प्रसङ्ग इति तत्राह नियम इति नियम्यतेऽनेनेति नियमो नियामको हेतुः प्रवृत्तीनां गुणकार्योत्पत्त्यादीनां गुणेषु सत्त्वादिष्वात्मनि पुरुषे वा यतो न भवेन्न संभवेदतः सदा प्रवृत्तिर्वा स्यादिति योजना नहि गुणपुरुषा तिरिक्तं किंचित्तत्त्वमभ्युपगतमस्ति सांख्यैर्यद्गुणेषु वा पुरुषेषु व स्थित्वा प्रवृत्त्यादिनियामक स्यादित्यर्थः ४६

यथाकथंचिदस्तु वा प्रधानप्रवृत्तिस्तथापि दोषप्रसक्ति परिहर्तुं न पार्यत इत्याह

वि षो क्तबद्ध ना दर्थ्येन च
अर्थार्थिनोस्त ब धो ना ज्ञो नेतरोऽपि । ४७

वि ष इ ति त दर्थ्ये प्रधानस्य पुरुषार्थत्वेसति बद्धमुक्तान विशेषो न युज्यते नहि सर्वपुरुषा प्रति साध रणे प्रध नस्यैकस्य व्यापारे केचिद्बद्धा केचिन्मुक्ता इति यवस्थोपपद्यते तथाच सर्व एव सदा बद्धा मुक्ता व स्युरित्यर्थः किंच सि मतेऽर्थार्थिनो शेषशेषिणोः सब धश्च न युज्यत इत्य वयः अर्थ्यते प्र थ्यते इत्यर्थः सुखतत्साधनरूपः पदार्थः सोऽभिलषितो विद्यते यस्य सोऽर्थ तयो सब ध उपकार्योपकारकभावलक्षण. स प्रधानवादे न युज्यते न घटत इत्यर्थ कुत इत्यत अ ह नेति ज्ञो ज्ञानैक स्वभावः पुरुषो नार्थयुक्तस्तस्यासङ्गत्वनिविशेषत्वाभ्युपगम न्नेतरोऽपि वा प्रध नाख्योऽपि नाथा जडत्व देवेत्यर्थः तस्मात्प्रधानस्य परार्थत्व कल्पनमयुक्तमिति भाव. ४७

एवं प्रधानस्य पुरुषा प्रति प्रवृत्तिमङ्गीकृत्याव्यवस्थोक्ता स पीद नीं न घटत इति साधयति

ध स्य च पारार्थ्ये रुष विक र
न ाख्य श ऽपि विकारेऽपि न यते ४८

प्रध न ति पुरुषस्याविकारतः प्रधानकृतातिशययोगित्वल क्षणविकाररहितत्वात् धानस्य पारार्थ्यं च न युक्तमिति योजना नह्यनुविधेयकृतातिशयायोगिनि स्व मि युपपद्यत इत्यर्थः यदि पुरुषस्य प्रधानप्रति स्वाम्योपपत्तये विकारोऽप्यङ्गीक्रियते तदाङ्गीकृतेऽपि विक रे प्रधानस्य पार र्थ्यं न युज्यते विकारवतो नित्यत्वनियमा न्नित्यप्रधानस्व यायोगादित्यर्थः सांख्यश स्त्रेऽपीत्यपिशब्द न्न वेद

बाह्यशास्त्रेष्वेव व्यवस्थ किंतु सांख्यशास्त्रेऽपीति तस्य पि पुबुद्धिमूलत्व
न सम्य वेदमूल वमस्तीति द्योत्यते ८

प्रधानपुरुषयो सब ध भावमुक्त प्रपञ्चयति

धानु ` प्रकृ ` पुरु स्य च
मिथो दथत्व धा स्याचितित ९

धानुपपत्ते ` ति पुरुषस्यासङ्गोदासीनस्वभावत्वात्प्रकृते
डत्वेन स्वतःप्रवृत्त्यनुपपत्ते योर्मिथ. सब ध नुपपत्ते· प्रधानस्य
ताद र्थ्ये पुरुषार्थत्वमयुक्त युक्तिशून्य अचितित्वतो जडत्व त् प्रधा
नस्य भृत्यवदुपकारकत्वासंभवादित्यर्थ अत प्रधानपुरुषयोरर्थ थित्व
ल्पना न युक्तेति भाव ४९

पुरुषस्याविकारत इत्युक्तमवि ारित्व स्पष्टयति

क्रि योत ै विनाशित ा ` च पूर्ववत्
नि ित्ते ़ निर्मोक्ष धा स्य प्रस य ` ५

क्रियोत्पत्त विरि पुरुषे यत्किंचित्क्रियोत्पत्तौ अभ्युपग यम
नाय विनाशित्व तस्य प्रसज्येत यत्क्रिय वत्तदनित्य यथा घटादीति
याप्तिदर्शन त् नित्यश्च पुरुषोऽभ्युपग यते सांख्यैरित्यर्थ ननु न परि
स्पन्द परिणामो वा पुरुषस्य क्रिय भ्युपगम्यते येन नित्यत्वप्रसङ्ग
कंतु ज्ञानमेव क्रियाभ्युपगम्यते इति चेत्तर्हि जन्यमज यं वा
ानमभ्युपेयते नोभयथापि घटत इत्याह ज्ञानमात्रे च पूर्वव
दिति ज यज्ञानयोगे विकारित्व दनित्यत्वापत्तिरजन्यज्ञानयोगित्वे न
प्रधानप्रति स्वाम्यसभव इत्युक्तदोपापत्तिरित्यर्थ. तस्मात्पुरुषस्यासङ्गो
दासीनत्व दनाधेयातिशयत्वात्प्रवर्तकत्व नुपपत्तेर यस्य च हेत्व तरस्य
प्रधानविक रातिरिक्तस्यानभ्युपगमात्प्रलये च प्रधानविकाराणामल धा

मतया प्रवर्तकत्वायोगान्निर्निमित्तैव प्रधानप्र त्तिरङ्गीक । तथाचा व्यवस्था सुस्थैवेति प्रतिप दयन्नुपसहरति निर्निमित्त इति प्रधानस्य यापारे निर्निमित्ते भ्युपगम्यमाने तस्य स दा वृत्तिसभव त् दृक्श क्ति ता पुरुषाणां तद्दर्शनस्य वर्जनीयत्वादनिमे क्ष प्रसज्येत अत इत्थमव्यवस्थितं सं ख्यशास्त्रं न मुक्षुभि श्रद्धेयमिति भाव ५

निगुणपुरुषमतप्रक्रिय निरा त्य सगुण पुरुषा इति वैशेषिक मत क्रिया दूषयति

श्य य ो नेनैव सुखादय
ए नी त्व ोऽग्रा स्यु कणादादिवत्मनाम् ५१

न मित्या दि । आत्मगतेन ज्ञानेन त्मगता सुखा दयो गुणाः प्रक शन्त इति हि ते म य ते न्नोपपद्यते तथाहि यथोष्णत्वमग्निनि मग्निनिष्ठेन प्रकाशेन न प्रकाश्य प्रकाशार्हं न भवति एकाश्रयत्वादेवं सुखादयो गुणा आत्मनि न ज्ञानेनाग्रा न । स्यु कुत. एकनीडत्वत एकाश्रयत्व त् कण दादि वर्त्मनां मत इत्यर्थ विषयविषयिणो. समानदेशत्वे ग्र मिद ग्राहकमिदमिति च भेदनियमो न सिध्येदिति भाव ५१

न केवलमेकाश्रयत्वादेव ज्ञ नसुखादीन भास्यभ सकत्वानुपपत्ति रपितु यौगपद्यासभव दपीत्याह

ग ् म े त्व वि । योरपि
नो ोगै हेतु ादग्रा त्व सु स्य च ५२

युगपदिति नेति पूवश्लोकादनुवर्तनीयम् तथाच यमर्थ सुखविज्ञ नयोर्न युगपत्समवेतत्व सभवति कुत' मनोयोगैकहेतु

त्वान्मनःसयोगस्य समवायिकारणस्यैकमेवात्मगुणंप्रति हेतुत्वाभ्युपग
मात्तथ च सुखासमव यिकारणमनःसंयोगनाशे सुखस्य नाशात्संयो
ग तरासमवायिक रणज्ञ नेन सुखस्य न ग्रा त्व प्रत्यक्षत उपपद्यते
इति अपिशब्दात्समवायोऽपि न प्रमाणयुक्तिपथमवतरतीति द्योत्यते
च्यश दादात्ममनसोर्निरवयवयो प्रदेश भावादात्मनोरिव संयोग नुप
पत्तिः संयोगे वा विभोरात्मनो विभ गानुपपत्तिस्तद ावे संयोगान्त
र नुपपत्तौ ज्ञान दिकार्यक्रम नुपपत्ति कार्याणां समवायिकारणदेशा
नतिवर्तित्वनियमदर्शनाद यत्रेहापि तत्प्रसङ्गेऽणुपरिम णमनःसंयोग
स्याणुदेशमात्रव र्तितया तत्कार्यस्यापि त मात्रवर्तित्वे सकलशरीरगत
त्मवेदनाया अप्रत्यक्षत्वप्रसङ्ग इत्यादिदूषणगण समुच्चीयते ५२

सुखवदेव दु ःखेच्छाद्वेषप्रयत्न नामप्यग्राह्यत्वं यायसा यादित्याह

तथ ये ा च भि त्वाद्युगपज्ज म ने य
गुणाना स वेतत्व ज्ञान चेन्न विशेष ात् ५३

तथेति अ येषां गुणानां भिन्नत्वात्परस्परविलक्षणत्व ज्ज्ञान
सुखयो रिव युगपज्ज म ने यते एकस्यात्ममनःसंयोगस्यानेककार्यहेतु
त्वासंभवस्योक्तत्व दित्यर्थः चकार देकाश्रययो र्विषयविषयित्वायोग
पूर्वो क्तः सगृह्यते माभूज्ज्ञ नभास्यत्वं सुखादीनामेकस्मिन्नात्मनि
समवेतत्वमेव तेषां ज्ञानं नामेत्य शङ्क्य ज्ञ नेन तेषां विशेषितत्वा
मैवमित्य ह गुणानामिति ज्ञात सुखं ज्ञातं दुःखमिति विशिष्ट
व्यवहारदर्शन दित्यर्थः ५३

एतदेव विशदयति

ज्ञ नेनै विशेष ज्ञ ान यत्व स्मृतेस्तथ
सुख ात ्येव व ाकृ त ५४

ज्ञानेनैवेति ज्ञानेन विशेषत्वादेव ज्ञानप्यत्वं सुखादीनामेष्ट व्यमित्यर्थः ज्ञानाहितसंस्कारजन्यस्मृतिविषयत्वादपि ज्ञानाप्यत्वं सुखादेरेष्टव्यमित्याह स्मृतेस्तथेति सुखं मया ज्ञातमित्येवं स्मृतेरिति संबन्धः किंच ज्ञानविशिष्टात्मसमवेतत्वं सुखादेर्ज्ञानमिष्यते केवलात्मसमवेतत्वं वा नाद्यः युगपत्क्षणिकात्मविशेषगुणानां समवयासंभवस्योक्तत्वादात्मगतसंख्यापरिमाणादेरपि ग्रहणप्रसङ्गश्चेत्यभिप्रेत्य द्वितीयं दूषयति तवेति तव मते आत्मनो ज्ञानभिन्नत्वद्घटवद्व्यमात्रत्वात्तत्समवेतत्वमात्रेण न सुखादिसिद्धिः सर्वस्य जडत्वादित्यर्थः. ५४

ज्ञानसुखादीनामात्मगुणत्वाभ्युपगमेन भास्यभासकत्वासंभव उक्तः. इदानीं तेषामात्मगुणत्वमपि दुर्भणमित्याह

सुखादेर्नात्मधर्मत्वमात्मनस्तेऽविकारतः
भेदादन्यस्मान्मनसो वा विशेषतः ५५

सुखादेरिति सुखादेरात्मधर्मत्वं न संभवति ते तव मते आत्मनो विकारतो विकारित्वाभावाद्विभुत्वाङ्गीकारेण नित्यत्वाभ्युपगमात् नहि नित्यमनित्यगुणकमिति सांप्रतिं दृष्टान्तः कोऽपि विद्यतेऽतो नात्मनो गुणवत्त्वसिद्धिः दूरे ग्राह्यग्राहकत्वकल्पनेति भावः किंच गुणगुणिनोरत्यन्तभेदवादिनस्तव मते अस्यैवात्मनोऽयं सुखादिरिति नियमोऽपि दुर्घट इत्याह भेदादिति अन्यस्यात्मान्तरस्य मनसो वा कस्मात् सुखादयो गुणा न स्युरविशेषितो भेदाविशेषादित्यक्षरार्थः अयमाशयः सर्वात्मनां विभुत्वाङ्गीकाराद्यच्छरीरावच्छेदेनात्मनि सुखादयो जायन्ते तत्र तदा सर्वात्मनां सत्त्वात्तद्भेदस्य च तत्रानवगमादस्यैवात्मनोऽयं सुखादिधर्मो नान्यस्येति नियन्तुं न

